एतस्य स्मृतिपादे निर्णीतत्वात्। तत्प्रयोजनस्य च कात्यायनेन अभिहितत्वात्। तथा हि।

"गवाश्वादिषु साधुत्वे प्रयोगेवा न कश्चन।
नियमोऽस्त्यस्ति वा नास्ति व्याकृतेर्मूलवर्जनात्॥
साधूनेव प्रयुञ्जीत गवाद्या एव साधवः।
इत्यस्ति नियमः पूर्व्वं तेन व्याकृतिमूलता" ॥ इति ॥

निर्मूलत्वेन विगीतत्वादयः पूर्व्वपक्षहेतवोऽप्युपलक्ष्यन्ते।

"निर्मूलत्वाद्विगीतत्वान्नैष्फल्यादेदवाधनात्।
पूर्व्वापरविरोधाच्च नास्त्यप्रामाण्यसम्भवः"॥

इति ते हेतवः उक्ताः। व्याकरणस्य पौरुषेयत्वात् मूलप्रामाणमपेक्षितं। अत एव बुद्धादिवाक्यानां प्रामाण्यं दूषितं।

"प्रायेणानृतवादित्वात् पुंसां भ्रान्त्यादिसम्भवात्।
चोदनानुपलम्भेश्च श्रद्धामात्रात् प्रमाणतः" ॥ इति ॥

न तावत् प्रत्यक्षमूलं गवादिशब्दा एव साधवः। न तु गाव्यादिशब्दाः। साधूनेव प्रयुञ्जीत नापशब्दानित्यस्यार्थद्वयस्य केनापीन्द्रियेण गृहीतुमशक्यत्वात्। योगिप्रत्यक्षस्यातीन्द्रियत्वात् तद्ग्राहकत्वमिति चेन्न।

"यत्राप्यातिशयो दृष्टः स स्वार्थानतिलङ्घनात्।
श्रेयोग्येनेन्द्रियग्राह्ये न रूपे श्रोत्रवृत्तिता" ॥ इति

आचार्य्यैरुक्तत्वात्। विगीतत्वमपि व्याकरणे मन्दम उपलभ्यते। अनादिसिद्धेऽभियुक्तव्यवहारे गृहीतसङ्गतिका गवादिशब्दा एव साधव इति भगवतो मतं। पाणिनिस्तु शास्त्रस्यामू-

Digitized by Google

द्वौ वाव पुरुषौ। यश्चैव धूर्वति। यश्चैनं धूर्वति। तावुभौ शुचार्पयति" (ब्रा०३का०।२प्र०।४अ०) इति। श्लोकेन योजयतीत्यर्थः। कल्पः "अनोऽभिमन्त्रयते त्वं देवानामसि सस्नितमं पप्रितमं जुष्टतमं वह्नितमं देवहूतममहुतमसि हविर्धानं दृꣳहस्व माह्वाः" इति। हे शकट त्वं देवानां सम्बन्धि भवसि ततः सुष्ठुतमं व्रीहिभिः पूर्णतमं प्रियतमं हविषो वाहकतमं देवानामाह्वातृतमश्चासि। किञ्च व्रीहिभारापादितवक्रत्वरहितं हविषो धारकमसि अतो दृढं भव। भग्नं मा भूः। मन्त्रस्य प्रथमभागे स्पष्टार्थत्वं दर्शयति "त्वं देवानामसि सस्नितमं पप्रितमं जुष्टतमं वह्नितमं देवहूतममित्याह। यथा यजुरेवैतत्" (ब्रा०३का०।२प्र०।४अ०) इति। मन्त्रपदैर्योऽर्थो यथा प्रतीयते स तथैव, न त्वत्र कश्चिदन्यो विवक्षाविशेषोऽस्ति। द्वितीयभागे व्रीहिभारप्रयुक्तं शैथिल्यं वार्यत इत्याह "अहुतमसि हविर्धानमित्याहानार्त्यै" (ब्रा०३का०।२प्र०।४अ०) इति। तृतीयभागे स्वयमप्यारोढुं शकटस्य धैर्यं सम्पाद्यत इत्याह "दृꣳहस्व माह्वारित्याह धृत्यै"। (ब्रा०३का०।२प्र०।४अ०) इति। अत एवापस्तम्बः उत्तरस्य भागस्य मन्त्रान्तरत्वमभिप्रेत्याह "अहुतमसि हविर्धानमित्यारोहति" इति। कल्पः "अग्रे पुरोडाशीयान् प्रेक्षते मित्रस्य त्वा चक्षुषा प्रेक्षे मा भेर्मा संविक्था मा त्वा हिꣳसिषं" इति। हे व्रीहि समूह अनुकूलमित्रस्य सूर्यस्य चक्षुषा त्वामवलोकयामि न तु वैरिचक्षुषा। ततो मा भैषीः माच कम्पिष्ठाः अहन्तु त्वां न मारयामि अनुकूलोऽयमिति बुद्ध्युत्पादनाय मित्रशब्दप्रयोग इत्याह "मित्रस्य



Digitized by Google

तैत्तिरीयब्राह्मणोत्पन्नो मन्त्रस्त्रैस्वर्य्येणैवाम्नायते तथापि सोमाय राज्ञे क्रीताय प्रोच्यमानायानुब्रूहीत्येवमादीनां बह्वृचब्राह्मणो-त्पन्नमन्त्राणां अयं भाषिकः स्वरः। अन्यदपि तत्रैव चिन्तितं।

"यदा कदाचिन्मन्त्रान्ते वा कर्म्मानियमाद्भवेत्।
आद्यो नैवं छलजन्यस्मृतेरङ्गत्वतोऽन्तिमः" ॥ इति ॥

इषे त्वेतिमन्त्रः शाखाछेदकरणं। इमामगृभ्णन्निति रश्ना-दाने। तत्र तत्र संशयः। किं मन्त्रादौ कर्म्म कर्त्तव्यं, उताच्छिनद्मीत्येवं विधस्य कर्म्मप्रकाशकमन्त्रस्योच्चारणकाले, किम्वा यस्य कस्यचित् पदस्योच्चारणकाले, आहोस्विन्मन्त्रान्ते, अथ वा ततोऽपि कञ्चित्कालं विलम्ब्येति। तत्र नियामकाभावाद्यदा कदाचिदिति प्राप्ते। ब्रूमः। छलमन्त्रजन्यमर्थस्मरणं कर्म्मणोऽङ्गं। तच्च मन्त्रसमाप्तेः पूर्व्वं नोदेति विलम्बेदुत्पन्नापि विनश्यतीति ततः परिशेषात् कर्म्मणे वामित्यादिमन्त्रान्ते कर्म्म सन्निपतेत्। तृतीयाध्यायस्य प्रथमपादे चिन्तितं।

"हस्तौ द्वाववनेनिक्ते स्तृणात्युलपराजिकां।
दर्भास्तरण एवाङ्गं हस्तशुद्धिरुताखिला ॥
तत्संचाङ्गत्वमन्त्रस्यादानन्तर्यात्मकात् क्रमात्।
लिङ्गप्रकरणाभ्यान्तु सर्व्वानुष्ठानशेषतः" ॥ इति ॥

दर्शपूर्णमासप्रकरणे श्रूयते हस्ताववनेनिक्ते उलपराजीं स्तृणातीति। वेद्यामास्तरितुं सम्पादितः स्तम्ब उलपराजी तत्र हस्तशुद्धिदर्भास्तरणवाक्ययोर्नैरन्तर्य्येण पाठात् क्रमप्रमाणेन हस्तशुद्धिरास्तरणमात्रस्याङ्गमिति चेत्। नैवं। अवनेजनं हस्त-

# शुद्धिपत्रं।

| अशुद्धं | शुद्धं | पृष्ठा | पङ्क्ति |
|---|---|---|---|
| कारिस्तः | कारिणः | २ | १३ |
| बाधक | बोधक | ३ | १ |
| स्तोमो | स्तोमो | ५ | १० |
| मन्त्रार्थंच | मन्त्रार्थं | ६ | ९ |
| स्तन | स्तान | ७ | ११ |
| यायमानं | याजमानं | ११ | २२ |
| वाद | वाद | १६ | ९ |
| पुर्वँ | पूर्वँ | १८ | १० |
| निवावरच | निवारच | १९ | १८ |
| चिराचि | चिराच | २३ | १ |
| ठवे | ठवे | २३ | ३ |
| प्राकव्यः | प्राकव्यः | २४ | १२ |
| पुष्कैकं तवः | पुष्कैकहेतवः | २९ | १ |
| जुष्ठं | जुष्ठं | ३० | १२ |
| नात्मीयन्तो | नात्मीयत्ता | ३१ | १७ |
| पाद्यते | पाद्यते | ३४ | ७ |
| रिधारच | विधारच | ३४ | ८ |
| विधारचां | विधारचं | ३८ | १ |
| ऊर्ज्जेव | ऊर्ज्जैव | ३९ | ८ |
| निष्ठ | निष्ठ | ४२ | ७ |
| रेत्वा | रेत्वात् | ४६ | २१ |
| वद्देम | वद्देम | ५० | १ |
| वैत | वैन | ५९ | १ |
| साम्नय्य | साम्नाय्य | ७८ | ७ |
| नुप्ययपत्तिः | नुपपत्तिः | ८२ | ३ |
| तं धर्वं | तं धूर्वं | ८४ | १३ |
| मये | मये | ८४ | १८ |
| महव्य | मैहव्य | ८५ | २ |
| शुश्रति | शुश्रति | ८६ | १३ |
| अध्वंयु | अध्वर्यु | ८८ | १९ |
| वक्रपा | वक्रपा | ९४ | ३ |

अधुलूखलमादध्यादग्नेस्तत्र हविः क्षिपेत् ॥
अद्रिर्मुसलमादत्त इषं दृषदि वादनं ।
वर्षं शूर्पमुपोह्याच प्रतिला हविरावपेत् ॥
परा व्रीहीन् परापूय रक्षसामिति सर्व्वशः ।
अधस्तुषं कपालेन क्षिपेदायुर्व्विविच्यते ॥
देवः क्षिपेद्धविः पाश्यां मन्त्राः सप्तदशेरिताः ।

अथ मीमांसा। तृतीयाध्यायस्य द्वितीयपादे चिन्तितं।

हविष्कृदेहीति मन्त्रस्त्रिरवघ्नन् समाह्वयेत्।
विनियोगोऽवघाते स्यादाह्वाने वा ऽवघातके ॥
ऐन्द्रिवन्मन्त्रमाह्वाने गौणं श्रुतिर्व्यर्थान्यथा ।
पाठेन प्रापितं चित्तं ह्वयतेरुपचारगीः ॥
त्रिरभ्यासो विधातव्यो नित्यप्राप्तेरभावतः ।
हन्तिना लक्ष्यते कालः प्राप्तोऽसौ ह्वयतिस्तथा ॥
विनियोगे वाक्यभेदो लिङ्गादाह्वानशेषता ।
ऐन्द्रिन्यायश्रुत्यभावाद्धविर्न्नायेन मुख्यगः ॥ इति ।

दर्शपूर्णमासयोः श्रूयते "हविष्कृदेहीति त्रिरवघ्नन्नाह्वयति" इति । देवानामर्थे या हविः सम्पादयति सा हविष्कृत् तामेनां सम्बोध्य अध्वर्युरेहीति ब्रूते। तथा चायं मन्त्रो ब्राह्मणेन व्याख्यायते "हविष्कृदेहीत्याह । स एव देवानाꣳ हविष्कृतः। ताम् ह्वयति" इति। तमिमं मन्त्रमुच्चार्य्याध्वर्युस्त्रिवारमवघातं कुर्व्वन्नाह्वयतीत्यर्थः। अनेन वाक्येन मन्त्रोऽवघाते विनियुज्यते न त्वाह्वाने। एहीत्येतन्मन्त्रगतं पदमाह्वाने समर्थं न

"वैद्यापघावघातः किमावर्त्त्यः सकृदेव वा

आवृत्तिः पूर्व्ववन्नैवं दृष्टार्थत्वाच्च वर्जनात्

अग्निचयने श्रूयते "उदुम्बरमुलूखलं सर्वौ

मावरत्न्यर्थेनदुपदधाति" इति। अत्रादृष्टम

सकृदेवावघातः। एकादशाध्यायस्य चतुर्थपादे

"अवघातार्थमन्त्रः किमसकृत् सकृदेव वा

प्रहारभेदादावृत्तिः कर्म्मैक्येन सकृद्भवेत्

अवरक्षो दिवस्सपत्नं वध्यासमित्यवहन्तीत्य

मन्त्र आवर्त्तनीयः। कुतः। अवघातस्य प्रहारभू

राणाञ्च भिन्नत्वादिति प्राप्ते ब्रूमः। तण्डुलनिष्

वाच्छिन्नप्रहाराभ्यासयुक्तस्यावघातस्यैकत्वात् तत्र

घातोपक्रमे सकृदेव पाठः। तत्रैवान्यच्चिन्तितं।

"नानाबीजेषु तन्मन्त्रः सकृद्वायोऽथवा सकृत्

चिकीर्षैक्यात् प्रयोगाणां भिन्नत्वादसकृद्भ

राजसूये नानाबीजेष्टिसमुदाये श्रूयते "अग्नये

दाशमष्टाकपालं निर्व्वपति कृष्णानां व्रीहीणां

स्तये श्यामाकश्चरुं" इत्यादि। तत्र सोऽवघा

वर्त्त्यः। कुतः। सर्व्वावघातविषयायामेकस्याश्चि

त्वादिति प्राप्ते ब्रूमः। मन्त्रोऽवघातस्योदका

वुध्यते तत्तद्बीजेषु तण्डुलनिष्पत्तौ स कृतार्थः स

कारे तण्डुलनिष्पत्तये मन्त्रस्यावघातस्य प्रयो

पाठः। दशमाध्यायस्य प्रथमपादे चिन्तितं।

Digitized by Google

क्षितव्यः तत्र व्रीहिरूपस्यापि विवक्षायां नीर
विवक्षयान्तु नीवाराणामपि विहितत्वेन अपूर्व्व
रवद्वाराद्वघातविषयत्वेनोक्तः सिध्यति। तत्रैवा
“मुषलाभ्युक्षणं हत्यै स्यादपूर्व्वायवोचितः।
न्यायः प्रकरणादन्यो व्यर्थं तस्मादिहान्यथा
प्रोक्षिताभ्यामुलूखलमुसलाभ्यामवहन्तीति श्रु
उलूखलमुसलद्रव्यद्वारावघातार्थं। कुतः। वा
प्रतीतेरिति चेत्। नैवं। प्रकरणेनापूर्व्वशेषत्वाव
माणं प्रकरणाद्वलीय इति वाच्यं, अपूर्व्वशेषत्वा
त्वात्। पूर्व्वपक्षे यथावघातः तथैव प्रोक्षणं। त
तयोरेव द्रव्याणां व्रीहीणामवनिर्भिन्नमिति श्रुतेषु
नेऽप्युक्ते सिद्धान्ते त्वपूर्व्वस्य प्रयोजकत्वादस्ति तत्रै
वघातवदन्या विचारा उदाहृताः।
अथ व्याकरणं। देवो व इत्यादिषु स्वरागता
अत्र बहुव्रीहिपक्षे नञ्सुभ्यां (पा० ६।२।१७२)
न्तोदात्तः प्राप्नोति ततस्तत्पुरुष एव कर्त्तव्यः।
चेत् तत्र भवतीत्यविरुद्धं तथाव्ययपूर्व्वपदप्रकृतिस्
ग्रहे प्रत्ययस्वरः। वसुसूर्य्यशब्दौ ह्रषादौ
वाक्यादित्वादामन्त्रितस्य निघातः। देवीरित्य
यज्ञपतिमित्यत्र पत्यावैश्वर्य्ये (पा० ६।२।१८) इ
विस्वरः। इदं ह्वर्ते हिंस्यतेऽस्मिन्निति इत्यद्
धातोः स्वार्थिकण्यन्ताज्जन्तत्वेन शपो यदिति

यत्प्रत्यये सति प्रत्ययस्वरं बाधित्वा तित्स्वरितं (पा० ६।१।१८५) इति स्वरितप्राप्तौ तदपवादः। यतो नावः (पा० ६।१।२१३) नौशब्दव्यतिरिक्तस्य यत्प्रत्ययान्तस्याद्युदात्तो भवति। ततो वृचेत्युपपदसद्भावात् समासान्तोदात्तत्वं बाधित्वा गतिकारकोपपदात्कृत्(पा० ६।२।१।३९)इत्युत्तरपदप्रकृतिस्वरत्वं। प्रोषिता इत्यत्र गतिरनन्तरः (पा० ६।२।४९) इति पूर्वपदप्रकृतिस्वरत्वं। अवधूतमित्यत्रापि तद्वत्। अधिषवणमित्यत्र षवणशब्दस्य ल्युट्प्रत्ययान्तत्वेन लिति (पा० ६।१।१९३) इति प्रत्ययात् पूर्वपदस्योदात्तत्वे सति समासे कृदुत्तरपदप्रकृतिस्वरत्वं। वानस्पत्यमित्यत्र वनस्पतेर्विकार इत्यस्मिन्नर्थे विहितस्तद्धितप्रत्ययस्वरान्तः। वाच इत्यत्र सावेकाचः (पा० ६।१।१६८) इति विभक्तिरुदात्ता। अधिषवणवद्दिषणं। देवबीतय इत्यत्र दासीभारादित्वाद्दासीभाराणाञ्चेति (पा० ६।२।४२) सूत्रांशेन पूर्वपदप्रकृतिस्वरे सति समासस्वरो बाध्यते। सुम्नमीत्यत्रोत्तरपदस्य प्रत्ययस्वरेणान्तोदात्तत्वात् कृदुत्तरपदत्वेनापि तदेव प्राप्तौ परादिश्छन्दसि बहुलं (पा० ६।२।१।९९) इत्युत्तरपदाद्युदात्तत्वं द्युमदित्यत्र मतुपः पित्वादनुदात्तत्वे प्राप्ते तदपवादः। ह्रस्वनुड्भ्यां मतुप् (पा० ६।१।१७६) इत्यस्मात्कुडागमाचोत्तरो मतुबुदात्तः स्यात्। अवधूतवत् परा पूतं। हिरण्यपाणिरित्यत्र बहुव्रीहित्वात् पूर्वपदस्वरः। हिरण्यशब्दस्याद्युदात्तेषु निपातितः।

इति माधवीये वेदार्थप्रकाशे प्रथमकाण्डे प्रथमप्रपाठके प्रथमोऽनुवाकः॥

Digitized by Google

षिवमिति, अपहतोऽररुः पृथिव्यै देवयजन्यै इत्याहन्ते, व्रजं गच्छ गोस्थानमिति हरति, वेदिं प्रत्यवेक्षते, वर्षतु ते द्यौरिति उत्करे निवपति, बधान देव सवितः परमस्यां परावति शतेन पाशैर्योऽस्मान् द्वेष्टि यञ्च वयं द्विष्मस्तमतो मा मौगिति" इति। अनयोः द्वितीयतृतीययोः पृथिव्देवयजन्योश्चयमा-समन्तो नाम्नातः, तथापि प्रथमपर्य्यायादनुषञ्जनीयः। यथा वाक्यस्य परिपूर्त्तये शब्दान्तरमनुषज्यते तथा प्रयोगपरिपू-र्त्त्यै मन्त्रानुषङ्गो व्याख्यः। अररुप्रयत्नेनोपहता वेदिभूमि-पांसवः कियन्तोऽपि प्रथपर्य्यायेऽपनीताः। तावता वेदिसर्व्वै-कदेशो यागयोग्यः सम्पन्नः। अनेनैवाभिप्रायेण द्वितीयपर्य्या-येऽपहतोऽररुः पृथिव्यै देवयजन्या इति पृथिव्यै विशेषणे। तृतीयपर्य्याये त्वदेवयजन इत्यररुविशेषणं। तदेवमनुपहता-स्तृणपांसवो यज्ञभूमेरुद्धृत्य यस्मिनुत्करदेशे निरस्यन्ते स देश उत्कर इत्युच्यते। कल्पः "अररुस्ते दिवं मास्कानिति त्रिरुत्तमा-भीभोऽभ्रिजिनाभिगृह्णाति" इति। हे पांसुसमूहरूपोत्कर तव सम्बन्धि योऽयमररुः स स्वर्गं मा गच्छतु। द्वितीयतृतीयप-र्य्याययोः प्रथमपर्य्यायवद् योक्तुं अशक्यतया तावुपेक्ष्य मन्त्रार्थं व्याचष्टे "ते मन्यन्त। दिवं वा अयमितः पतिष्यतीति। तमर-रुस्ते दिवं मास्कानिति दिवः पर्य्यबाधन्त। भ्रातृव्यो वा अररुः। अररुस्ते दिवं मास्कानिति यदाह। भ्रातृव्यमेव दिवः परि-बाधते" (ब्रा०।१का०।२प्र०।८अ०) इति। ते देवाः केनाप्युपा-येन अररुबन्धनं छित्वा फलविघाताय स्वर्गं गमिष्यतीति

Digitized by Google

हवींष्यासादयतीति च। तथा तद्धर्माः श्रूयन्ते। वेदिं खनति बर्हिर्लुनाति इत्यादयः। मुख्यानि हवींष्याग्नेय पुरोडाशादीनि। अमुख्यहवींष्यपि तु प्रयाजाद्यर्थानि। तत्र स्वस्वधर्मसहितानि वेद्यादीनि प्रकरणवशान्मुख्यहविषामेवाङ्गानि। वेद्यां हवींष्यासादयतीति वाक्यात् सर्वहविरङ्गतेति चेत्, प्रकरणेन वाक्यस्य सङ्कोचनीयत्वात्। यदि वाक्यं प्रकरणनैरपेक्ष्येण स्वतन्त्रं स्यात् तदा सादनमात्रपर्यवसानेन यागाभावे वैयर्थ्यं स्यात्, सौमिकहविषामपेतवेद्यासादनं प्रसज्येत, तस्मान्मुख्यं हविः सर्वं वेद्यादिकमिति प्राप्ते ब्रूमः। अस्तु वैयर्थ्यातिप्रसङ्गपरिहारेण प्रकृतापूर्वसाधनभूतहविःषु वेद्यादेरङ्गत्वं। प्रयाजादिहविःष्वपि स्वकीयापूर्वद्वारा मुख्यापूर्वसाधनत्वेनेति तदङ्गत्वमपि वेद्यादेर्युक्तं। एवञ्च सति वाक्यस्यात्यन्तसङ्कोचो न भविष्यति। पञ्चमाध्यायस्य प्रथमपादे चिन्तितं।

"पुरोडाशाभिवासान्तस्यापकर्षोऽस्ति दर्शके।
न वाऽऽद्योऽपकृष्टा वा वेदिर्वैमुख्यहानये॥
अभिवासात् परा वेदिरिति तत्क्रमबाधितः।
प्रागेव विहिताद्दर्शे वेदिर्नातोऽपकर्षणं" इति॥

दर्शपूर्णमासयोः पुरोडाशस्य कपालेषु श्रपितस्याच्छादनमाम्नातं भस्मनाऽभिवासयतीति। तत ऊर्द्धं वेदिराम्नाता। तेनैव क्रमेण पौर्णमासे यागे प्रतिपदनुष्ठानं कृतं, दर्शयागे तु वेदेरपकर्षं आम्नातः। पूर्वेद्युरमावास्यायां वेदिं करोतीति। तत्र वेदेः पूर्वभाविनोऽभिवासनान्तस्याङ्गसमूहस्यापकर्षः कु-



Digitized by Google

सम्मार्ष्टि, मज्रां योनिं मा निर्मृक्षं वाजिनीं त्वा सपत्नसाहीꣳ सम्मार्ज्मि" इति। हे स्रुग्घ सर्वां त्वाम मा विनाशयामीत्यभिप्रेत्य शत्रूणां वैरिणामभिभवितारं त्वां सम्यक् शोधयामि। एवमन्येषु योज्यं। द्वितीयतृतीययोर्मन्त्रयोर्मा निर्मृक्षमित्यादिरनुवर्त्तते। मन्त्राणां स्पष्टार्थत्वमभिप्रेत्य तद्व्याख्यानमुपेक्ष्यानुष्ठानं विधत्ते "स्रुचः सम्मार्ष्टि" (ब्रा०।३का०।३प्र०।१अ०) इति। तत्र क्रमं विधत्ते "स्रुवमग्रे पुमाꣳसमेवाभ्यः सꣳश्यति मिथुनत्वाय" (ब्रा०।३का०।३प्र०।१अ०) इति। स्रुवः पुमान् जुह्वाद्याः स्त्रियः। ततश्चाभ्यः पूर्वभावित्वं स्रुवस्य युक्तं। संश्यति सम्यक् तनूकरोति व्यवहारार्थं संस्करोतीत्यर्थः। जुह्वादीनां पौर्वापर्यं विधत्ते "अथ जुह्वं। अथोपभृतं। अथ ध्रुवाम्" (ब्रा०।३का०।३प्र०।१अ०) इति। प्रशंसति "असौ वै जुहूः। अन्तरिक्षमुपभृत्। पृथिवी ध्रुवा। इमे वै लोकाः स्रुचः। वृष्टिः सम्मार्जनानि। वृष्टिर्वा इमाꣳल्लोकाननुपूर्वं कल्पयति। ते ततः क्लृप्ताः समेधन्ते" (ब्रा०।३का०।३प्र०।१अ०) इति। क्रमावस्थानसाम्येन स्रुचां लोकत्वं। सम्मृज्यन्ते स्रुचो यैर्दर्भाग्रैस्तानि सम्मार्जनानि। पूर्वं दर्भैर्वेदं कृत्वा तदग्राणि परिवास्य तानि वेदपरिवासनानि स्रुचां सम्मार्जनाय स्थापितानि। तेषां वृष्टिजनकत्वात् वृष्टिरूपत्वं। वृष्टिरूपैर्दर्भाग्रैर्लोकरूपाणां जुह्वादीनां क्रमेण सम्मार्जने सति वृष्टिरेवानुक्रमवर्त्तिनो लोकान् धान्यादिमतान् करोति। ततस्ते लोकाः सम्पन्नाः सम्यगभिवर्धन्ते। वेदग्रं प्रशंसति "स मेधन्तोऽस्या इमे लोकाः प्रजया पशुभिः।

विधत्ते "ईश्वरो वा एषोऽन्धो भवितोः। यश्चक्षुषाऽऽज्यमवेक्षते। निमील्यावेक्षेत। दाधारात्मंश्चक्षुः। अभ्याज्यं धारयति" (ब्रा०।३का०।३प्र०।५अ०) इति। आज्यस्यादित्यमण्डलवत्तेजस्वित्वा-न्नैरन्तर्यवीक्षणेनान्धो भवितुं प्रभुर्भवति। तच्च निमीलनेन स्वात्मन्यविनष्टचक्षुषो* धारणादन्धो न भवति। वीक्षणेनाज्यम-भिधारयति। विधत्ते "आज्यं गृह्णाति। छन्दाꣳसि वा आज्यं। छन्दाꣳस्येव प्रीणाति" (ब्रा०।३का०।३प्र०।५अ०) इति। आज्यस्य यज्ञसाधनत्वेन छन्दस्साम्यं। जुह्वविशेषेणाहुतिविशे-षं विधत्ते "चतुर्जुह्वां गृह्णाति। चतुष्पादः पशवः। पशू-नेवावरुन्धे। अष्टावुपभृति। अष्टाक्षरा गायत्री। गायत्रः प्राणः। प्राणमेव पशुषु दधाति। चतुर्ध्रुवायां। चतुष्पादः पशवः। पशुष्वेवोपरिष्टात् प्रतितिष्ठति" (ब्रा०।३का०।३प्र०।५अ०) इति। गायत्र्या रचितत्वात् प्राणो गायत्रः। तथा च वाजसनेयिनः समामनन्ति "प्राणा वै गयास्तत्प्राणाꣳस्तत्रे तद्यद्गयाꣳस्तत्रे तस्माद्गायत्री नाम" इति। स्वाधीनत्वेनावरुद्धेषु पशुषु पश्चात्प्रयोगेन प्रतितिष्ठति। यागस्याज्यस्य जुह्वविशेषेण ग्राह्याधिकपरिमाणं विधत्ते "यजमानदेवत्या वै जुहूः। भ्रा-तृव्यदेवत्योपभृत्। चतुर्जुह्वां गृह्णन् भूयो गृह्णीयात्। अष्टा-वुपभृति गृह्णन् कनीयः। यजमानायैव भ्रातृव्यमुपस्तिं क-रोति" (ब्रा०।३का०।३प्र०।५अ०) इति। उपसमीपे अधम-त्वेनास्ति तिष्ठतीत्युपभृत्। सङ्ख्यां पुनः प्रकारान्तरेण स्तौति

* स्वात्मप्रविष्टचक्षुषो० इति का०।

"गौर्वै स्रुचः। चतुर्जुह्वां गृह्णाति। तस्माच्चतुष्पदी। अष्टावुपभृति। तस्मादष्टाशफा। चतुर्ध्रुवायां। तस्माच्चतुःस्तना। गामेव तत्संस्करोति। सास्मै संस्कृतेषमूर्जं दुहे"(ब्रा०।३का०।३प्र०।५अ०) इति। अभिमतदोहनात् स्रुचां गोरूपत्वं सङ्ख्यया तदवयवसाम्यं च। ततः स्रुचामाज्यपूर्त्तिरूपो यः संस्कारस्तेन गामेव संस्करोति। सा च गौः पयोरूपमन्नमाज्यरूपं रसञ्च दुग्धे। गृहीतस्याज्यस्य यथोचितमाहुतिक्रमं दर्शयति "यज्जुह्वां गृह्णाति। प्रयाजेभ्यस्तत्। यदुपभृति। प्रयाजानूयाजेभ्यस्तत्। सर्व्वस्मै वा एतद्यज्ञाय गृह्यते। यद्ध्रुवायामाज्यं" (ब्रा०।३का०।३प्र०।५अ०) इति। पञ्चसु प्रयाजेषु चयं जौहवस्थेन विभागः, द्वयं चौपभृतार्द्धेन, त्रिकेण त्वनूयाजाः। यच्च ध्रुवायामाज्यं तच्च सर्व्वार्थं शेषं। अथ विनियोगसङ्ग्रहः।

"प्रत्युष्य स्रुचस्तपेदग्नेर्मृष्टेरूर्ध्वं पुनस्तपेत्।
गोष्ठं वाचं तथा चक्षुः प्राणं मार्ष्टि क्रमात् स्रुचः॥
जुहूपभृद्ध्रुवा आशा पत्नीं योक्त्रेण नह्यति।
सुप्रेति पत्न्युपविशेद्दिमं काले विमोचनं॥
समायुषा* पूर्णपात्रं अपेक्ष्य मध्यिद्रयात्।
घृतं निरूप्य वीक्षेत तेजोऽधिश्रित्य पश्चिमे॥
वक्ष्णो तेजो हरेदग्निः पूर्व्वाग्रावधिसंश्रयेत्।
अग्ने व्रतानि त्रिस्रा गृह्णीते त्रिभिराज्यकं॥
उत्पूय देवेजस्तुत्पुनात्याज्यमवेक्षतः।

* समापत्नी इति का० पा०।

प्रतिप्रस्तरमुपादत्ते" इति। हे प्रस्तर त्वं व्यापिनो यज्ञस्य स्-
ङ्गातरूपो धारकोऽसि। तदेतद्दर्शयति "विष्णोस्तूपोऽसीत्याह।
यज्ञो वै विष्णुः। यज्ञस्य धृत्यै" (ब्रा०।१का०।१प्र०।६अ०)
इति। विधत्ते "पुरस्तात् प्रस्तरं गृह्णाति। मुख्यमेवैनं करोति"
(ब्रा०।१का०।१प्र०।६अ०) इति। वेदेः पूर्व्वभागे ब्रह्मा यज-
मानो वा प्रस्तरं धारयेत्। तच्च सूत्रेऽभिहितं "ब्रह्मा प्रस्तरं धा-
रयति यजमानो वा" इति। धारणाय मुखसमानोन्नत्यं हस्तेना-
भिनीय विधत्ते "इयन्तं गृह्णाति। प्रजापतिना यज्ञमुखेन संमितं"
(ब्रा०।१का०।१प्र०।६अ०) इति। वेदिखननवाक्य इवाच-
प्यभिनयः प्रादेशमात्रपरत्वेन व्याख्येयः। तदेवानूद्य प्रशंसति
"इयन्तं गृह्णाति। यज्ञपरुषा संमितं। इयन्तं गृह्णाति। एतावद्वै
पुरुषे वीर्य्यं। वीर्य्यसंमितं" (ब्रा०।१का०।१प्र०।६अ०) इति।
परुः पर्व्व। तच्च यज्ञपुरुषस्य हस्तकूर्परयोरुभयतः प्रादेशमात्रं
भवति। प्रसारितयोरङ्गुष्ठकनिष्ठिकयोरङ्गुल्योर्यावन्मध्यं ताव-
देव पुरुषे सामर्थ्यं। हानोपादानाद्यशेषव्यापाराणां तत्रैव नि-
ष्पत्तेः। पक्षान्तरं विधत्ते "अपरिमितं गृह्णाति। अपरि-
मितस्यावरुध्यै" (ब्रा०।१का०।१प्र०।६अ०) इति। यावदोन्नत्ये
स्वस्य सौकर्य्यं तावदेव गृह्णीयात्। तथापरिमितफलसम्पत्तये
भवति। उत्पवनहेतोः पवित्रयोः प्रस्तरे स्थापनं विधत्ते "त-
स्मिन् पवित्रे अपि सृजति। यजमानो वै प्रस्तरः। प्राणापानौ
पवित्रे। यजमान एव प्राणापानौ दधाति" (ब्रा०।१का०।
१प्र०।६अ०) इति। प्रस्तरस्य यजमानवद्यज्ञचिह्नत्वेनैतुत्वात

ध्वमारभ्येत्यनेन यष्टृभिः सूचिता। ऋतुशब्दार्थं दर्शयति "ऋतुना यज्ञो यज्ञपतेरित्याहानार्त्यै" (ब्रा०।३का०।३प्र०।७अ०) इति। इन्द्रशब्दार्थमाह "इन्द्रावान्त्स्वाहेत्याह। इन्द्रियमेव यजमाने दधाति" (ब्रा०।३का०।३प्र०।७अ०) इति। कल्पः "बृहद्भा इति स्रुचमुद्गृह्णाति" इति। अनेनाघारेण ज्वालारूपं यथा बृहद्भवति तथायमग्निर्भासते ततो जुह्वमादद्य-नाभिव्युद्गृह्णाति। अधिकभासनेन स्वर्गं प्राप्यत इत्याह "बृहद्भा इत्याह। सुवर्गो वै लोको बृहद्भाः। सुवर्गस्य लोकस्य समष्ट्यै" (ब्रा०।३का०।३प्र०।७अ०) इति। कल्पः "अथासꣳस्पर्शयन्त्स्रुचावुद्गृह्याक्रमन् जपति, पाहि माग्ने दुश्चरितादामा सुचरिते भज" इति। भज स्थापय। जुहूपभृतौ परस्परमस्पर्शयन् विविक्तं प्रतिनिवृत्त्यागमनं विधत्ते "यजमानदेवत्या वै जुहूः। भ्रातृव्यदेवत्योपभृत्। प्राणा आघारः। यदꣳस्पर्शयेत्। भ्रातृव्येऽस्य प्राणान् दध्यात्। असꣳस्पर्शयन् प्रत्याक्रामति। यजमान एव प्राणं दधाति" (ब्रा०।३का०।३प्र०।७अ०) इति। यजमानवचामे मुख्यायत्तत्वात् जुहूः यजमानोऽभिमन्यते। नोपभृतस्थाज्यस्य जुहूद्वारा होम इति व्यवहितत्वमुपभृतः। तस्मै भ्रातृव्यो देवता। अर्थवादान्तरे वा एतदेव द्रष्टव्यं। मन्त्रस्य पदार्थवाक्यार्थौ दर्शयति "पाहि माऽग्ने दुश्चरितादामा सुचरिते भजेत्याह। अग्निर्वाव पवित्रं। वृजिनमनृतं दुश्चरितं। ऋजुकर्मꣳ सत्यꣳ सुचरितं। अग्निरेवैनं वृजिनादनृताद्दुश्चरितात्पाति। ऋजुकर्मे सत्ये सुचरिते भजति। तस्मादेवमाशास्ते।

आत्मनो गोपीथाय" (ब्रा०।१का०।१प्र०।७अ०) इति। कायिकं निषिद्धाचरणं वृजिनं विहिताचरणमृजुकर्म्म। वाचिके सत्यानृते। कल्पः "शुक्रा धुवां समनक्ति, मखस्य शिरोऽसि सं ज्योतिषा ज्योतिरङ्क्तामितिचिः" इति। हे आघारशेष त्वं यज्ञस्य शिरोवदुत्तममङ्गमसि। अतस्तद्रूपेण ज्योतिषा धौवाज्यरूपं ज्योतिः समक्तं संयुज्यतां। समञ्जनं विधत्ते "शिरो वा एतद्यज्ञस्य। यदाघारः। आत्मा धुवा। आघारमाघार्य्य धुवाꣳ समनक्ति। आत्मन्नेव यज्ञस्य शिरः प्रतिदधाति" (ब्रा०।१का०।१प्र०।७अ०) इति। ग्रीवादधस्तनो देश आत्मा। पूर्व्वपचत्वेन द्विरावृत्तिं विधत्ते "द्विः समनक्ति। द्वौ हि प्राणापानौ" (ब्रा०।१का०।प्र०।७अ०) इति। सिद्धान्तमाह "तदाहुः। त्रिरेव समञ्ज्यात्। त्रिधातु हि शिर इति। शिर एवैतद्यज्ञस्य। अथो त्रयो वै प्राणाः। प्राणानेवास्मिन् दधाति" (ब्रा०।१का०।१प्र०।७अ०) इति। त्वगसृगस्थिरूपा शिरस्थास्त्रयो धातवो यस्य स त्रिधातुः। मन्त्रगतज्योतिःशब्दविवचां दर्शयति "मखस्य शिरोऽसि सं ज्योतिषा ज्योतिरङ्क्तामित्याह। ज्योतिरेवास्मा उपरिष्टाद्दधाति। सुवर्गस्य लोकस्यानुख्यात्यै" (ब्रा०।१का०।१प्र०।७अ०) इति। अस्य धौवाज्यशेषस्योपरि स्थापितेनाघारशिष्टाज्येनात्युज्ज्वलं सत् प्रदीपेनेव स्वर्गलोकः प्रकाशितो भवति। अत्र विनियोगसङ्ग्रहः।

"धुवोऽग्निरञ्जलिं कृत्वा जुप दाभ्यां तयोर्ग्रहः।
अग्ना दक्षिणदिग्गामि विष्णो शित्वा समाहृतिः॥
इन्द्राः सुचमुद्धृत्य पाहि प्रतिनिवर्त्तते।

Digitized by Google

मन्त्रकार्य्यं तच्च क्लृप्तं, तस्माद् द्वितीयाघारे हिरण्यगर्भमन्त्रविधिः। यत्तु प्रजापतिदेवतालिङ्गं तदिन्द्रेऽपि समानं। इन्द्रोऽपि हि प्रजानां पतिः। तस्मादूर्द्ध्वोऽध्वर इति मन्त्रं बाधित्वा हिरण्यादिमन्त्रस्यैव विधीयते। इतीयाध्यायस्याष्टमपादे चिन्तितं।

"मामा सन्ताप्तमित्येतत् कस्मिन् स्वामिनि* पूर्व्ववत्।
अध्वर्य्योर्वस्तुतत्वेन स्वामिकर्म्मोपयोगतः"॥ इति।

मामेति मन्त्रोक्तं सन्तापाभावरूपं फलं यजमाने स्यात् अध्वर्य्यौ वेति सन्देहः। पूर्व्वाधिकरणे ममाग्नेवर्च इत्यध्वर्युणा पठ्यमानेऽपि मन्त्रे ममेतिशब्दोऽध्वर्युं स्वामिनं यजमानं लक्षयति। स्वर्गकामो यजेतेत्यात्मने पदे साङ्गयागफलस्य स्वर्गस्य यजमानगामीत्यवगमात्। ततो यथा वर्चो यजमाने भवति तथा सन्तापाभावोऽपि यजमानगामीति प्राप्ते ब्रूमः। अध्वर्य्यावसन्तप्ते सत्यविघ्नेन स्वामिनः कर्म्म समाप्यते, तस्मादध्वर्युगतोऽपि सन्तापाभावो यजमानस्यैव फलमिति नात्र पूर्ववद्स्योपचारः।

अथ व्याकरणं। भुवनशब्दो नियतनपुंसकलिङ्गत्वादाद्युदात्तः। अग्न इत्यत्र वाक्यादित्वान्न निघातः। आमन्त्रितं पूर्व्वमविद्यमानवत् (पा०८।१।७२) इति तस्य अविद्यमानत्वाद्वाक्यादेरित्येतस्य पदात् परत्वाभावान्न निघातः। किन्तु षाष्ठिकमामन्त्रिताद्युदात्तत्वं। अग्नाविष्णू इत्यत्रापि तद्वत्। न विद्यतेऽध्वरो विघ्नो हिंसा वा यस्य सोऽध्वरः। नञ्सुभ्यां

* स्यात् इति का० पा०।

Digitized by Google

निग्राभेणाधराꣳ अकरिति सव्येनोपस्थं निगृह्णाति। उद्ग्रा-भञ्चेति गुल्फमुपच्छति। निग्राभञ्चेत्युपस्थं। ब्रह्मदेवा अवीवृध-न्निति प्राचीं गुल्फमूहति। अथा सपत्नानिन्द्राग्नी मे विषूचीनान् व्यस्यतामिति प्रतीचीमुपस्थं प्रत्यूहति"। अनस्य प्रसवहेतुना-ऽनुया गुल्फा ऊर्द्ध्वग्रहणेनेन्द्रो मां मामूर्द्ध्वमग्रहीत्। अधोपस्थतो नीचग्रहणेन मम वैरिणो निकृष्टान् बद्धानकरोत्। पूर्वं ब्रह्म देवाश्च वैरिणो निकर्षञ्च ममोत्कर्षं वर्द्धितवन्तः। अथेन्द्राग्नी मम सपत्नान् विश्वग्गतया स्वस्थानभ्रष्टा यथा भवन्ति तथा विक्षे-पेण प्रवर्त्तयतां। एतन्मन्त्रव्याख्यानात् पूर्वमिडाभक्षणादिकं विधीयते तच्च गुल्फव्यूहनात् प्रागनुष्ठेयत्वात्। तत इडाभागस्य पु-रोडाशादपच्छेदं विधत्ते "धिष्णिया वा एते न्युप्यन्ते। यद्-ब्रह्मा। यद्धोता। यदध्वर्युः। यदग्नीत्। यद्यजमानः। तान् यदन्तरेयात्। यजमानस्य प्राणान्त्सङ्कर्षेत्। प्रमायुकः स्यात्। पुरोडाशमपगृह्य सञ्चरत्यध्वर्युः। यजमानायैव तल्लोकꣳ शिꣳ-षति। नास्य प्राणान्त्सङ्कर्षति। न प्रमायुको भवति" (ब्रा० ३का०।३प्र०।८अ०) इति। धिष्णिया नामकाः केचन देवाः सोमस्य रक्षकाः। तथा च श्रूयते "धिष्णिया वा अमुष्मिँल्लोके सोममरक्षन्" इति। ते च धिष्णियाः सोमयागे वेदिकासदृशा-स्थानाः क्रियन्ते* "पांसुना धिष्णियानुपवपति" इति श्रुतेः। तेषाञ्च धिष्णियानामतिक्रमणं तत्रैव निषिद्धं "प्राणा वा एते। यद्धिष्णियाः। यदध्वर्युः प्रत्यङ्धिष्णियानतिसर्पेत्। प्राणा-

* पांसायन्ते इति का० पा०।

धर्म। द्विपदो न चतुष्पदः। ध्रुवाननपगान् कुर्व्विति पुरस्तात् प्रत्यञ्चमुपगूहति। तस्मात् पुरस्तात् प्रत्यञ्चः शूद्रा अवस्थन्ति" (ब्रा०।३का०।३प्र०।११अ०) इति। तमुत्करमुपगूहतीत्यन्वयः। यमित्यादिर्मन्त्रः। यं पलाशशाखामूलभागं देवा मनुष्यसम्बन्धियज्ञेषु कपालोपधानाद्युपकर्म्मकारिणमुपवेषमकल्पयन्। हे उपवेष स त्वं ये पुत्रभार्यादयोऽस्मत्तोऽपरक्तास्तानस्मदर्थमिच्छामीयानुरक्तान् कुरु। हे उपवेष अस्माकं समीपे प्रजादिकं विद्धि व्याप्तं कुरु। मनुष्यान् पशूंश्च चिरजीविनो वियोगरहितांश्च कुरु। अनेन मन्त्रेण उपवेषमुत्करे मृत्खननादिरूपे हणादित्यागस्थाने पूर्व्वभागे प्रत्यङ्मुखं गूढं कुर्यात्। यस्मादेवं तस्माल्लोकेऽपि उपवेषवत् कर्म्मकराः शूद्राः स्वाम्यभिमुखाः स्वामिनः पुरस्तात् सर्व्वदा अवतिष्ठन्ते। निःशेषेण गूहनं विधत्ते "स्वविमत उपगूहति। अप्रतिवादिन एवैनान् कुरुते" (ब्रा०।३का०।३प्र०।११अ०) इति। अयमुत्करे प्रवेश्य मूलं बहिर्नावशेषयेत् किन्तु स्वविष्ठान् मूलादारभ्य क्रत्स्नं प्रवेशयेत्। तथा सत्येतान् भृत्यान् अप्रतिवादिनः उक्तकारिणः कुरुते। अभिचाराय मन्त्रान्तरमुत्पादयितुं प्रस्तौति "धृष्टिर्वा उपवेषः। शुचर्त्तो वज्रो ब्रह्मणा सञ्शितः" (ब्रा०।३का०।३प्र०।११अ०) इति। अयमुपवेषः स्वत एव धार्ष्ट्ययुक्तः। तत ऊर्द्ध्वं वह्निसन्तापेन युक्तः। पुनरपि मन्त्रेण तीक्ष्णीकृतत्वाद्वज्रः सम्पन्नः। अतोऽभिचारयोग्यः। तच्च मन्त्रमुत्पाद्य विनियुङ्क्ते "योपवेषे शुक्। सा ऽमुमृच्छतु यं द्विष्म इति। अयास्मै नाम

सर्व्वप्रयोगेषु तथैव प्राप्तत्वात्। तस्मात्छन्दोद्वयं पठितव्यं। अनेन न्यायेन प्रकृतेऽप्यैन्द्राग्नयागे इन्द्राग्नीशब्देनैव विभक्तेषु देवताऽभिधातव्या, पार्थिवत्वयागे त्वग्निपथिकृच्छब्दद्वयेनेति द्रष्टव्यं।

अथ व्याकरणं। उभेत्यत्र टाप्स्वरैकादेशस्वरौ। इन्द्राग्नीशब्दे त्वाष्टमिकामन्त्रितनिघातः। आङ्क्वध्या इत्यत्र तुमर्थे विहितस्य कध्यैप्रत्ययस्यादिस्वकार उदात्तः। ततः समासे कृत्स्वरः। एवं सर्व्वमुन्नेयं। अस्मिन् प्रथमप्रपाठके शब्दस्वरप्रक्रिया लेशतः प्रदर्शिता। साकल्येन तु प्रकृतिप्रत्ययविकरणतन्त्रादेशादिपरिज्ञानमन्तरेण दुर्बोधत्वात् तस्य च सर्व्वशाखाभिर्वैदिकशब्दप्रकाशे निरूपितत्वादत्रापि तन्निरूपणे ग्रन्थगौरवप्रसङ्गात् तत्रैव सर्व्वमवगन्तव्यं। तदिदं याज्याकाण्डं वैश्वदेवं। तथा चानुक्रमणिकायामुक्तं।

"राजसूयस्य ब्राह्मणः पशुबन्धः सप्रेष्टिकः।
उपानुवाक्यं याज्यास्तु अश्वमेधः सब्राह्मणः॥
च चायनस्य होमाश्च सूक्तानि च सप्रेष्टिभिः।
सौत्रामणी सयाज्याहैः पशुर्मेधस्य योजन"॥ इति।

अनुमत्यै पुरोडाशमित्यादिकोऽमन्त्रकाण्डोऽष्टमप्रपाठको राजसूयः। अनुमत्या इत्यादिका विधिकाण्डस्थाः षष्ठसप्तमाष्टमप्रपाठकाश्चयोऽपि राजसूयः सब्राह्मणं। वायव्यं श्वेतमालभेतेत्यादिप्रपाठकोक्ताः पशुबन्धाः। प्रजापतिः प्रजा असृजत ताः सृष्टा इत्यादिप्रपाठकद्वयोक्ता इष्टयः। प्रजापतिरकामयत प्रजाः सृजेयेत्यादिकमुपानुवाक्यं। उभावाग्निन्द्राग्नी इत्यादयो याज्याः। ओमूलतेत्यादिकमत्र तथाक्षो

ज्योतिष्टोमे केशश्मश्रुवपनपयोव्रतादयो यजमानसंस्कारा आम्नाताः। यद्वैः सोमयागो ज्योतिष्टोमे मुख्यः। अग्नीषोमीयपश्वादिकमङ्गं तत्र द्वयोर्मुख्याङ्गयोरेते वपनादय उपकुर्वन्ति। कुतः। कर्तृधर्मत्वात्। यजमानो हि कर्तृतया वपनादिभिः संस्क्रियते। कर्तृत्वञ्च यथा मुख्यं प्रति तस्य विद्यते तथाङ्गं प्रत्यप्यस्ति तस्मादुभयोरुपकार इति चेत्। नैवं। द्वौ हि यजमानस्याकारौ क्रियाकर्तृत्वं फलभोक्तृत्वं चेति तयोरदृष्टः फलभोगः क्रियानिष्पत्तिस्तु दृष्टा। तथा सति वपनादिकृतोपकारस्याप्यदृष्टत्वाद्भोक्तृवेषा वपनादयः फलभोगसाधने मुख्ये एव पर्य्यवस्यति। वपनादिसंस्काररहितैर्ऋत्विग्भिः कृषीवलादिभिश्च निष्पाद्यमाना दृश्यते। ततस्तच्च कर्तृत्वाकारे वपनादिकृतः स उपकारो नास्ति। तस्माददृष्टफलभोगिनो यजमानस्य योऽयमदृष्टरूपः शास्त्रीयसंस्कारः सोऽयं मुख्ये कर्म्मणि युक्तो नाङ्गेषु। नाच पूर्व्ववद्वाक्यमस्ति येन परस्परया फलसाधनाङ्गेषु वपनाद्युपकारः सञ्चरेत। प्रकरणन्तु मुख्यस्यैव न त्वङ्गानां तस्मान्न तेषूपकारः। तच्चैवाष्टमे पादे चिन्तितं।

"संस्कारा वपनाद्याः किमध्वर्य्योः स्वामिनोऽथ वा।
आध्वर्य्यास्तत्र सकलात् तद्देहोक्तेश्च तस्य ते॥
संस्कारैर्योग्यतां प्राप्य स्वकार्य्यं कर्त्तुमृत्विजः।
क्रीणात्यन्या क्रिया तेषां संस्क्रिया यजमानगा"॥ इति।

आप उन्दन्तु जीवस इत्याद्याः संस्कारमन्त्राः तद्विधयश्च [illegible] समाम्नाताः। केशश्मश्रुवपते नखानि निकृन्तत इति।

मुपावर्त्तते विक्रयामहा इति अह्मगन्धर्व्वा अवदन्नगायन् देवाः
सा देवान् गायत उपावर्त्तत तस्माद्गायन्तᳫं स्त्रियः काम-
यन्ते" (सं॰६का॰।१प्र॰।६अ॰) इति। विक्रयामहै विलक्षणं यथा
भवति तथैव आकारयामः। ब्रह्म वेदः। एतद्दृष्टान्तवेदनं
प्रशंसति "कामुका एनᳫं स्त्रियो भवन्ति य एवं वेदाऽथो
य एवं विद्वानपि अन्येषु भवति तेभ्य एव ददत्युत यद्बहुतया
भवन्ति" (सं॰६का॰।१प्र॰।६अ॰) इति। वरस्य स्निग्धाः
वरार्थं कन्यामन्वेष्टुं प्रवृत्ता बान्धवा जन्याः। तादृशानां ज-
न्यानां द्वौ वर्गौ। तत्रैकस्मिन् वर्गे यथोक्तवेदनरहिता अनेक-
गुणान्तरोपेता बहवो वरा यद्यपि सन्ति तथापि तं वर्गमवेक्ष्य
येषु अन्येष्वेकोऽप्येवंविद्वान् वरो भवति तेभ्य एव अन्येभ्यः कन्यां
तत्पितरो ददति। सोमक्रयण्या गुणं विधत्ते "एकहायन्या
क्रीणाति वाचैवैनᳫं सर्व्वया क्रीणाति तस्मादेकहायना मनुष्या
वाचं वदन्ति" (सं॰६क॰।१प्र॰।६अ॰) इति। वाग्देवतायाः
सोमक्रयणीरूपस्वीकारात् सर्व्ववाचा क्रय उपपद्यते। एकसंवत्स-
रस्वीकाराच्च तस्मिन् वयसि सति वचनव्यवहारोपक्रमः। वर्ज्य-
दोषान् विशदयति "अकूटयाऽकर्णयाऽकाणयाऽश्लोणयाऽसप्तश-
फया क्रीणाति" (सं॰६का॰।१प्रा॰।६अ॰) इति। कूटा कुटि-
लशृङ्गी, अकर्णा छिन्नकर्णोपेता, काणा लेकाक्षी, श्लोणा कुष्ठा-
दिदूषिता, सप्तशफा न्यूनाङ्गी, एता वर्ज्याः। उपादेयां दर्शयति
"सर्व्वयैवैनं क्रीणाति" (सं॰६का॰।१प्र॰।६अ॰) इति। सर्व्वाव-
यवसम्पूर्णेत्यर्थः। विपक्षे बाधकपुरःसरं स्वपक्षं विधत्ते "यच्छ्वे-



Digitized by Google

अग्निरभ्यध्यायत्। ताः समभवत्। तस्य रेतः परापतत्। तद्धिरण्यमभवत्" इति। तस्माद्धिरण्यस्य वह्निः पिता आपो मातरः, तस्मात् स्वतः शुद्धं हिरण्यं यदि कदाचिद्रजस्वलादिस्पर्शेन शोधनीयं भवति तदा अग्नः पुनन्ति, जलेनैव शोधयन्ति, न तु कांस्यतामादेरिव भस्माम्यादिकमपेक्षते। जुह्वां हिरण्यप्रक्षेपेण विशिष्टं होमं विधत्ते "ब्रह्मवादिनो वदन्ति कस्मात्सत्येनानस्थिकेन प्रजाः प्रवीयन्तेऽस्थन्वतीर्जायन्त इति यद्धिरण्यं घृतेऽवधाय जुहोति तस्मादनस्थिकेन प्रजाः प्रवीयन्तेऽस्थन्वतीर्जायन्ते (सं०६का०१प्र०७अ०) इति। तस्मादनस्थिकेन वीर्येण प्रजाः प्रवीयन्ते गर्भीक्रियन्ते, उत्पत्तिकाले तनस्थियुक्ता जायन्ते। तत्र वीर्यसदृशं आज्यं। अस्थिसदृशं हिरण्यं। तदिदं सादृश्यं निर्वोढुं ईश्वरेणास्थिनिर्मीयत इत्यर्थः। वह्निसम्बन्धबोधनपरतया मन्त्रं व्याचष्टे "एतद्वा अग्नेः प्रियं धाम यद्घृतं तेजो हिरण्यमियन्ते शुक्र तनूरिदं वर्च इत्याह सतेजसमेवैनꣳ सतनुं करोत्यथो सम्भरत्येवैनं" (सं०६का०१प्र०७अ०) इति। एनमग्निं सम्भरति सम्यक्करोति। एष ह्येव वह्निसम्बोधनेन तदीयतेजोरूपेण हिरण्यमन्त्रः प्रकाश्यते। हिरण्यस्य सूत्रेण बन्धनं विधत्ते "यदबद्धमवदध्याद्गर्भाः प्रजानां परापातुकाः स्युर्बद्धमवदधाति गर्भाणां धृत्यै" (सं०६का०१प्र०७अ०) इति। सूत्रायाकर्षणेन यथा सहसा मुच्यते तथा बध्नीयादिति विशेषं विधत्ते "निष्टर्क्यं बध्नाति प्रजानां प्रजननाय" (सं०६का०१प्र०७अ०) इति। निःशेषेण सहसा मोचनयोग्यं निष्टर्क्यं।

# शुद्धिपत्रं।

| अशुद्धं | शुद्धं | पृष्ठा | पङ्क्ति |
|---|---|---|---|
| बौंमा | सोम | २९८ | २० |
| यात्वायं | यात्वानं | ३०३ | १४ |
| उत्याय | उत्पादय | ३०५ | १९ |
| र्युते सन्न | र्युतेऽसं न | ३०६ | ९ |
| मभिष्ठय | मभिष्ठये | ३०९ | १२ |
| तनोऽवन्तु | तेनोऽवन्तु | ३०९ | १४ |
| रायस्पोषव | रायस्पोषेव | ३१०\|३१७ | ११\|१२ |
| मच्छ्रीन्द्राय | मच्छेहीन्द्राय | ३२० | ११ |
| न्यवर्तन | न्यवर्त्तत | ३२६ | ३ |
| निष्यन्नं | निष्पन्नं | ३२७ | ९ |
| सोमाहयं | सोमाहरयं | ३२८ | १४ |
| कुष्ठा | कुष्ठा | ३२९ | १९ |
| मुद्रत | मुद्धृत | ३३६ | १८ |
| नवा | नव | ३३६ | २१ |
| वस्तादि | वस्त्रादि | ३३९ | ४ |
| वस्ताद्य | वस्त्राद्य | ३३९ | ६ |
| स्तान | स्तान् | ३५४ | ४ |
| वत | वत् | ३५५ | १४ |
| वन्धुः | बध्नुः | ३५५ | १८ |
| कोऽची | कोची | ३५७ | १७ |
| स्योनमिति | स्योनं” इति | ३५८ | १२ |
| प्रथम | द्वितीय | ३६० | १२ |
| पोतिष्ठति | पोत्तिष्ठति | ३६१ | ११ |
| सङ्कुतं | सङ्कृतं | ३६६ | १४ |
| प्रच्यवस्य | प्रच्यवस्व | ३६६ | ११ |
| सामा | सोमा | ३८४ | १२ |
| सखीत्सम्या | सखीन्त्सम्या | ३८४ | १४ |

Digitized by Google

प्रकृतित्वान्न केनापि हीनोऽतोऽत्र विकल्प्यतां ॥
साङ्गाङ्गिन्याहीनसञ्ज्ञा रूढैषाऽहर्गणो भवेत्।
षष्ठीश्रुत्या द्वादशत्वं प्रक्रियातोऽपकृष्यतां" ॥ इति ।

ज्योतिष्टोमप्रकरणे श्रूयते तिस्र एव साह्नस्योपसदो द्वादशाहीनस्येति। एकेनाह्ना निष्पाद्यत्वात् साह्नो ज्योतिष्टोमः दीक्षादिवसात् ऊर्ध्वं सोमाभिषवदिवसात् पूर्व्वकर्त्तव्या होमा उपसदः तासां द्वादशत्वं प्रकरणबलाज्ज्योतिष्टोमे निविशते। अहीनशब्दश्च तस्मिन्नेव कल्प्यते। ज्योतिष्टोमस्य निखिलसोमयागप्रकृतित्वेन न सर्व्वेषामङ्गानां तत्रोपदेशे सति तदुपदेशविकलविकृतीनामहीनत्वाभावात्। अतो द्वादशत्वत्रित्वयोर्विकल्प इति प्राप्ते ब्रूमः। अहत्नःसोमयागरूपो द्विरात्र त्रिरात्रादिरहर्गणस्तस्मिन्नहीनशब्दो रूढः। यौगिकत्वे तु न हीन इति विग्रहे समासे कृते अयशादिशब्दवदाद्युदात्तः स्यात् मध्योदात्तस्त्वाम्नायते। रूढिश्च विग्रहनिरपेक्षत्वाच्छीघ्रबुद्धिहेतुः। अतो ज्योतिष्टोमवाचिनः साह्नशब्दाङ्गिन्येयमहीनसञ्ज्ञा ज्योतिष्टोमाङ्गिनमहर्गणमभिधत्ते। तस्मिन्नहर्गणे षष्ठी श्रुत्या यदुक्तं द्वादशत्वं निवेश्यते तत् सिद्धये प्रकरणादिदमुन्नेतव्यं*। तृतीयाध्यायस्य सप्तमपादे चिन्तितं।

"मुख्यार्था यौमिकी वेदिरुभयार्थीत मुख्यगा।
चिकीर्षितत्वान्मुख्यस्य वेद्यां तत्कृतिसम्भवात्॥

* दपनेतव्यं इति का० ।

आप उन्दन्वाकूत्यै दैवीमियं ते वरुव्यस्यश्मुना ते सोमं त उदायुषा प्रध्वयस्वाग्रेरातिथ्यमश्सुरश्मुर्विनायनीमेसि युञ्जते क्षुधपाजस्वतुर्दश ॥ १४ ॥

आपो वरूव्यसि यातवेयंगीस्वतुस्त्रिश्मत् ॥ ३४ ॥

हरिः ॐ ॥

इति तैत्तिरीयसंहितायां प्रथमकाण्डे द्वितीयप्रपाठके चतुर्दशोऽनुवाकः ॥

चयोदशेऽनुवाके हविर्धानमण्डपनिर्माणमुक्तं। यद्यपि नैतावता किञ्चित् प्रमेयं परिसमाप्तं तथाप्यध्यापकसम्प्रदायपरम्परया प्रपाठक उत्तरानुवाके समाप्यते इत्यन्तिमानुवाकलाचतुर्दशे काम्या सामिधेन्यः पुरोऽनुवाक्या याज्याश्चोच्यन्ते। तचेष्टिकाण्डे आतपत्येष्टेरूर्ध्वं राचोघ्नेष्टिरेवमाम्नायते "अग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपेद्यश् रक्षाश्सि सचेरन्नग्निमेव रक्षोहणश् स्वेन भागधेयेनोपधावति स एवास्माद्रक्षाश्स्यपहन्ति" (सं०२का०।२प्र०।२अ०) इति। सचेरन् समवेयुः बाधेरन्नित्यर्थः। मध्यराचिकालं विधत्ते "निशितायां निर्वपेन्निशितायाश् हि रक्षाश्सि प्रेरते सम्प्रेर्णान्येवैना निहन्ति" (सं०२का०।२प्र०। २अ०) इति। प्रेरते प्रकर्षेण चरन्ति। अतस्तस्यां वेलायां निर्वापेण प्रचारवन्त्येवैनानि रक्षांसि हन्ति। यागभूमेः परितो वेष्टनं विधत्ते "परिश्रिते याजयेद्रक्षसामनन्ववचाराय" (सं०

विभजतीत्याम्नातो विश्वाभिख्यो यस्तद्रूपोऽसि। हे पोत्रीय त्वमुशिक् कमनीयः कविर्विद्वानसि। हे नेष्ट्रीय सोमरक्षकौ यावङ्गारि बम्भारिनामकौ तद्रूपोऽसि। हे मध्यवाकसम्बन्धिन् अवस्य ते त्वा वाताय स्वाहा दुवस्य ते त्वा वाताय स्वाहेत्याम्नातावदस्य दुवस्वन्तौ वातविशेषौ तद्रूपोऽसि। हे मार्जालीय त्वं शुन्ध्यूः शोधकः पात्रप्रक्षालनेन लेपमार्जकस्थानभूतोऽसि। हे आहवनीय सम्यक्राजमानः कृशानुरसि। हे आस्ताव स्तोत्रस्थान परिषद्यः परितः सद्योग्यः पवमानः पूतोऽसि। हे चात्वाल कृष्णविषाणत्यागार्थं प्रतक्वाऽसि प्रकृष्टगमनविषयोऽसि। नभस्वान् अन्तरवकाशवान् पशुश्रपणप्रदेश राचैरसंमृष्टोऽसि। हे हव्यसूद हरयादिहव्यपाचकोऽसि। हे औदुम्बरि ऋतधामा सामगानाहृतमवश्यम्भावि धाम उपवेशनस्थानं यस्याः तादृशी सुवर्ज्योतिः उन्नतत्वेन स्वर्गप्रकाशिकाऽसि। हे ब्रह्मसदन त्वं ब्रह्मज्योतिः ब्रह्मनामकस्यर्त्विजः प्रोक्षणादिकर्माभ्यनुज्ञानरूपं ज्योतिर्यस्मिन् स्थाने तादृशमसि सुवर्धाम स्वर्गसदृशं स्थानं यस्य तथाविधमसि। हे नूतनगार्हपत्य यो देवः प्रोष्ठपदा नक्षत्रमज एकपाद्देवतेत्याम्नातः तद्रूपोऽसि। पुरातनं गार्हपत्यमित ऊर्ध्वमृत्विजः परित्यजन्तो भवन्ति। हे त्याज्यगार्हपत्य यो देवः प्रोष्ठपदा नक्षत्रं अहिर्बुध्नियो देवतेत्याम्नातः तद्रूपोऽसि। आग्नीध्रीयमारभ्य पुराणगार्हपत्यान्तेषु षोडशसु स्थानेषु अभिमन्यमान हे अग्ने त्वदीयेन रौद्रेण सैन्येन राक्षसेभ्यो मां पाहि कर्मफलप्रदानेन मां पाहि। पिपृहि पूर्णमनोरथं कुरु। महि-

"यांश्च निर्वपति यद्गुदिशति तेन ताम्" (सं०६का०।३प्र०।१अ०) इति। प्रीणातीत्यनुवर्त्तते। अनुदेशो मन्त्रेणोपस्थानं। अत्र विनियोगसङ्ग्रहः।

"विभूः पञ्चयात्मानो मन्त्राः षोडश निर्वपेत्।
धिष्ण्यादिषेषु सर्व्वेषु रौद्रेणेत्यनुदिश्यते" ॥ इति ।

अत्र मीमांसा नास्ति। छन्दसी उक्तैव।

इति माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये प्रथमकाण्डे तृतीयप्रपाठके तृतीयोऽनुवाकः ॥ ० ॥

त्वँ सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्य उरु यन्तासि वरूथँ स्वाहा जुषाणो अप्तुराज्यस्य वेतु स्वाहाऽयन्नो अग्निर्वरिवः कृणोत्वयं मृधः पुर एतु प्रभिन्दन्। अयँ शत्रून् जयतु जर्हृषाणोऽयं वाजं जयतु वाजसातौ। उरु विष्णो विक्रमस्वोरु क्षयाय नः कृधि। घृतं घृतयोने पिब प्र प्रयज्ञपतिं तिर। सोमो जिगाति गातुवित् ॥ १ ॥

देवानामेति निष्कृतमृतस्य योनिमासदमदित्याः सदोऽस्यदित्याः सद आसीदैष वो देवसवितः सोमस्तँ रक्षध्वं मा वो दभदेतत् त्वँ सोम देवो देवानुपागा इदमहं मनुष्यो मनुष्यान् सह प्रजया सह रायस्पोषेण



Digitized by Google

सहार्थतां दर्शयति "अदित्याः सदोऽस्यदित्याः सद आसीदे-
त्याह यथायजुरेवैतत्" (सं० ६का०।२प्र०।२अ०) इति। कल्पः
"अथैनं देवताभ्यः सम्प्रयच्छति, एष वो देव सवितः सोमस्तꣳ
रक्षध्वं मा वो दभत्" इति। एतावन्तं कालं यजमानः सोम-
मरक्षत। इत ऊर्ध्वं हे देवा युष्मदीयं सोमं यूयमेव रक्षध्वं।
यद्यपि इन्द्रादयो देवाः सर्वे सम्बोधनीयाः तथापि परिदृ-
ढत्वात्प्रसवोपलक्षणार्थं सवितैव सम्बोध्यते। मा वो दभत् सोमं
रक्षमाणान् युष्मान् कश्चिदपि मा हिंसीत्। सवितृसम्बोधन-
तात्पर्यमाह "यजमानो वा एतस्य पुरा गोप्ता भवत्येष वो
देव सवितः सोम इत्याह सवितृप्रसूत एवैनं देवताभ्यः सम्प्र-
यच्छति" (सं०६का०।२प्र०।२अ०) इति। बोधायनः "सम्प्र-
दायोपतिष्ठते, एतत् त्वꣳ सोमदेवो देवानुपागा इदमहं म-
नुष्यो मनुष्यान् सह प्रजया सह रायस्पोषेण" इति। हे सोम त्वं
देवः सन् भवदीयान् देवान् एतर्हीदानीं प्राप्तोऽसि, अहमपि म-
नुष्यः सन् मदीयान् मनुष्यान् इदमिदानीं प्राप्तोऽस्मि। कीदृशो
ऽहं। पुत्रादिप्रजया पश्वादिधनपुष्ट्या च सह वर्त्तमानः। मन्त्रभा-
गयोर्द्वयोः प्रशंसां तृतीयभागे विपर्ययबाधञ्च दर्शयति "एतत्
त्वꣳ सोम देवो देवानुपागा इत्याह देवो ह्येष सन् देवानुपैती-
दमहं मनुष्यो मनुष्यानित्याह मनुष्यो ह्येष सन् मनुष्या-
नुपैति यदेतद्यजुर्न ब्रूयादप्रजा अपशुर्यजमानः स्यात् सह प्र-
जया सह रायस्पोषेणेत्याह प्रजयैव पशुभिः सहेमं लोक-
मुपावर्त्तते" (सं०६का०।२प्र०।२अ०) इति। बोधायनः "नमो

ह्रः को हि तद्वेद यद्वसीयान् स्वे वशे भूते पुनर्वा ददाति न वेति”
(सं० ६का०।२प्र०।२अ०) इति। अग्ने व्रतपत इत्येतावत् प्रतीकं।
स्वकीया पूर्व्वा तनूरग्निवकाशात् सहसा स्वीकार्य्येति बुद्धिमन्त
आहुः। कुतः। वसीयान् अत्यन्तधनिकः प्रभुः परकीये वस्तुनि
स्ववशीभूते सति पुनः स प्रभुर्ददाति वा न वेति यत् तत् को
नाम वेद, ततो वशीभावात् प्रागेवादेया। ग्रावादीनामाग्नीध्रे
स्थापनं यत् पूर्व्वमुक्तं तत् प्रशंसति “ग्रावाणो वै सोमस्य राज्ञो
मलिम्लुसेना य एवं विद्वान् ग्राव्ण आग्नीध्र उपवासयति नैनं
मलिम्लुसेना विन्दति” (सं० ६का०।२प्र०।२अ०) इति। मलि-
म्लुसेना विरोधितस्करसेना। अथ विनियोगसङ्ग्रहः।

“त्वं जुषा पश्चिमे वह्नौ वैसर्जनहुतिर्द्वयं।
आग्नामुखीयतो वह्निं हृत्वा प्राग्नोऽभिधारिति हि॥
उदु कृत्वा पूर्व्ववह्नौ सोमो राजानमयतः।
हविर्धानं नयत्यच सर्व्वं संस्तीर्य्य सादयेत्॥
अदित्यादेव सोमं निर्दिश्येते निमन्त्रयेत्।
इदं दक्षिणमावृत्य नमः प्रागञ्जलिः स्वधा॥
दक्षिणाञ्जलिरेतन्वाभिर्गच्छेत् मण्डपादिकं॥
पुनर्व्विहारमोक्षित्वा वेश्या पूर्व्वाग्निमीक्षते।
अग्ने वह्नेरुपस्थानं मन्त्राः षोडश कीर्त्तिताः” ॥ इति।
अथ मीमांसा। प्रथमाध्यायस्य तृतीयपादे चिन्तितं।
“वैसर्जनाख्यहोमीयवाससो ग्रहणस्मृतिः।
प्रमाणं वा श्रुत्यबाधात् प्रमाणस्यादष्टकादिवत्॥

मीयपशोरङ्गमिति प्रबयनच्छेदयोर्नान्योन्यक्रमो विवक्षितः। त-स्मात्कृतस्य यूपच्छेदमात्रस्यापकर्षः। एकादशाध्यायस्य तृतीय-पादे चिन्तितं।

"अग्नीषोमीयभिन्नेषु यूपो भिन्नोऽथ तन्त्रता।
उपदेशातिदेशाभ्यां भिन्नो नो कालभेदतः"॥ इति।

ज्योतिष्टोमे पशव अग्नीषोमीयसवनीयानूबन्ध्यास्त्रयो विहि-ताः, तेषु यूपच्छेदो युक्तः। कुतः। अग्नीषोमीये प्रत्यक्षवचनेन त-दुपदेशात्, इतरयोश्चोदकाभ्यामतिदेशादिति प्राप्ते ब्रूमः। न तावदग्नीषोमीयपशोः कर्मणः काले यूपस्योत्पत्तिः। ततः प्रागेव यूपोत्पत्तिकालः। दीक्षासु यूपं छिनत्ति क्रीते राजनीति तत्का-लविधानात्। अत आधानवत् सर्वार्थत्वं सम्भवति। यथा स्वकाले सम्पन्नमाधानं तदाश्रयविशेषेषु तेषु कर्मसु सम्बध्यते तथा स्वकाले छेदनादिना निष्पन्नो यूपः प्रत्यक्षचोदकाभ्यां तत्र तत्र विनियुज्यते। तस्मात् तन्त्रेण यूपः सम्पादनीयः। तत्रैव द्वितीयपादे चिन्तितं।

"यूपैकादशिनी यूपाहुतेर्भेदोऽथ तन्त्रता।
सामीप्यभेदाद्राद्योऽन्त्यः सामीप्यं दृष्टिगं यतः"॥ इति।

यूपैकादशिन्यां चोदकप्राप्ता यूपाहुतिः प्रतियूपं भिद्यते। कुतः। यूपस्यान्तिकेऽग्निं मथित्वा यूपाहुतिं जुहोतीति तद्विधा-नात् सामीप्यानाञ्च भेदादिति प्राप्ते ब्रूमः। न तावदत्यन्तसा-मीप्यं सम्भवति यूपदाहप्रसङ्गात्। अतो यावता व्यवधानेन यूपा दृष्टिगोचरा भवन्ति तावतो देशस्य समीपत्वमभ्युपेयं। तथा

## इति तैत्तिरीयसंहितायां प्रथमकाण्डे तृतीयप्रपाठके नवमोऽनुवाकः ॥ * ॥

अष्टमानुवाके वपाश्रपणमुक्तं। वपाश्रपणस्य पशोः वपोत्खेदो नवमे विधीयते। बौधायनः "वानुपूर्व्यं पशोः प्राणानाप्याययति, वाक्त आप्यायतामिति वाचं, प्राणस्त आप्यायतामिति प्राणं, चक्षुस्त आप्यायतामिति चक्षुः, श्रोत्रं त आप्यायतामिति श्रोत्रं, तानेव पुनः संमृशति, या ते प्राणाञ्छुग्जगाम या चक्षुर्या श्रोत्रं यत् ते क्रूरं यदास्थितं तत् त आप्यायतां, तत् त एतेन शुन्धतामिति, नाभिस्त आप्यायतामिति नाभिं, पायुस्त आप्यायतामिति पायुं, सङ्गृह्य पदः प्रक्षालयति, शुद्धाश्चरित्राः शमह्नः शमोषधीभ्यः शं पृथिव्यै शं महोभ्यामिति, त्रिष्टा दक्षिणतोऽनुपृष्ठं निनयेत्" इति। आपस्तम्बोऽत्र किञ्चिद्विशेषमाह "या ते प्राणान् शुग्जगामेति हृदयदेशꣳ शुद्धाश्चरित्रा इति पादानेकैकमाप्याय्य जपति, शमह्न इति, पुरा लोकानां भूमेः प्रवणाच्छमोषधीभ्यः शं पृथिव्या इति, भस्मान्तꣳ शेषं निनीय" इति। हे पशो मदीया वागिन्द्रियं शोकत्यागशोकं सम्यज्य स्वीकरिष्यमाणदेवतार्थे सुखेनाप्यायतां वर्द्धतां। एवमन्यत्रापि। किञ्च निर्यापणकाले हृदयपुण्डरीके सङ्कुचितान् तव प्राणवायून् चक्षुरादीन्द्रियाणि च यः शोको जगाम यच्च बन्धनं मुखनिरोधादिकं क्रूरमस्माभिः कृतं यदपि छेदादिकमास्थितं कर्तुमुपस्थितं तव तत्सर्वमाप्यायतां शाम्यतु। किञ्च तावत् तव त-

Digitized by Google

न्ववचारयि" (सं०६का०।४प्र०२अ०) इति। विततस्य वि-
स्तीर्णस्य यज्ञस्य यतो यदङ्गं विस्मृत्य न क्रियते तदेव छिद्र-
मनुप्रविश्य रचांस्यवचरन्ति अपकुर्वन्ति वसतीग्रहणेन तदङ्गं
क्रियमाणमेव भवे ऽते भवति। अग्नीध्रे सादितानां तृतीयसव-
नगताभिषवपर्यन्तं धारणं विधत्ते "न ह्येता ईलयन्त्या तृती-
यसवनात् परिशेरे यज्ञस्य सन्तत्यै" (सं०६का०।४प्र०।२अ०)
इति। एता आपो न ह्यवगमयन्ति किन्तु परिशेरे अवति-
ष्ठन्ते स्थापयेदित्यर्थः। अत्र विनियोगसङ्ग्रहः।

"हविर्ष्टेह्लाति वसतीवरीरग्नेस्तु सादयेत्।
शालामुखीयतः पश्चात् स्रुचा स्रुचो* अपेत् पुनः॥
इन्द्रमित्रहृयादेदि श्रोणोरा सादयेत् क्रमात्।
विश्वे ह्याग्नीध्र धिष्ण्यस्य पश्चादासादयेत् पुनः॥
यज्ञेति मन्त्रयेत् मन्त्राः सप्तमन्त्रा इहोदिता"॥ इति।

अत्र मीमांसा नास्ति।

अथ छन्दः। हविष्मतीत्यनुष्टुप्।

इति माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये प्रथम-
काण्डे तृतीयप्रपाठके द्वादशोऽनुवाकः॥ * ॥

हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वोर्द्ध्वमिम-
मध्वरं कृधि दिवि देवेषु होत्रा यच्छ सोमराजन्नेह्यव-
राड़ मा भेर्मा सं विक्था मा त्वा हिꣳसिषं प्रजास्त्वमु-

* स्वामी इति का०।

मन्त्राणामाम्नातत्वात् कथं तूष्णीं ग्रहणं। एवं तर्हि तूष्णीं-ग्रहणवाग्विसर्गग्रहणाभ्यां उपांशूच्चौ ध्वनी विवक्षेयातां। अत एवोपानुवाक्यकाण्डे समाम्नायते "यान् प्राचीनमाग्रयणाद्ग्रहान् गृह्णीयात् तानुपांशु गृह्णीयात् यानूर्ध्वांस्तानुपब्दिमतः" इति। ध्वनिद्वयं लौकिकदृष्टान्तेन विशदयति "यथा क्षारीयति म चाक्ष इयति नापराद्धामीत्युपावसृजत्येवमेव तदध्वर्युराग्रयणं गृहीत्वा यज्ञमारभ्य वाचं विसृजते"(सं०६का०४प्र०११अ०) इति। क्षारी इषुवतिर्व्याधः क्षर संचलनगताविति धातुः। स व्याधो मृगपक्षाद्यौ विचार्य पश्चाद् बाणानुपावसृजति मुञ्चति वराहान् मृगान् पातयितुं। मार्गे यो गतं आयामेन लभ्यते स व्याधः अमैतावति दूरं आपतिष्ठति, अहं लोपत् पुरो गत इयति दूरे स्थितो नापराद्धामि। वराहादिभिः सह मारणमेकोऽपराधः आत्मानं दृष्ट्वा वराहादेः पलायनमन्योऽपराधः तेन मुक्तस्य बाणस्य स्खलनमपराधान्तरं एतत् सर्वमियति दूरे मम न भविष्यतीति निश्चित्य मतिः तत्र स्थित्वा पश्चादवसरे सति पश्चादुद्भूतो यथा बाणान् मुञ्चति तथैव तत्राध्वर्युर्मूढध्वनिः कांश्चिद्ग्रहान् गृहीत्वा यज्ञं दृढमवष्टभ्य पश्चाद्ध्वनिं प्रकटीकरोतीत्येतदुपपद्यते। विधत्ते "त्रिर्हिंकरोत्युद्गातॄनेव तद्वृणीते" (सं०६का०४प्र०११अ०) इति। हिंकारस्य सामस्तु प्रसिद्धत्वात् सामगानां तेन वरणं युक्तं। हिंकारस्य वाक्यं विधत्ते "प्रजापतिर्वा एष यदाग्रयणो यदाग्रयणं गृहीत्वा हिंकरोति प्रजापतिरेव तत् प्रजा अभिजिघ्रति

प्रधानग्रहाणां समाप्तत्वेन पारतन्त्र्याभावात् तस्मादयं मतया-रूप इव। तथा सत्यध्वर्योर्होमे मुक्तस्य बलीवर्दस्य आत्मस्य पुनः शकटे योग इव भवति। गृहीतस्य हारियोजनस्य होमात् पूर्वं शिरसि धारणं विधत्ते "शीर्षन्नधिनिधाय जुहोति शीर्षतो हि स समभवत्" (सं०६का०।५प्र०।९अ०) इति। अत्र सूत्रं "बह्वीभिर्धानाभिः श्रीला शीर्षन्नधिनिधायोपनि-ष्क्रम्य" इति। होमकालेऽत्याश्रावणदेशाहीषत्पुरतो चलनं कृत्वा होतव्यमिति विधत्ते "विक्रम्य जुहोति विक्रम्य हीन्द्रो वृत्रम-हन्समृद्ध्यै" (सं० ६का०।५प्र०।९अ०) इति। भक्षणकाले हा-रियोजनधानानां मानसं चर्वणं विधत्ते "पशवो वै हारियो-जनीर्यत् सम्भिन्द्यादल्पा एनं पशवो भुञ्जन्त उपतिष्ठेरन् यन्न सम्भिन्द्याद्बहव एनं पशवो भुञ्जन्त उपतिष्ठेरन् मनसा स बाधत उभयं करोति बहव एवैनं पशवो भुञ्जन्त उपतिष्ठन्ते"(सं०६का०। ५प्र०।९अ०) इति। पशुप्राप्तिहेतुत्वात् धानाः पशवः सम्भि-न्द्यादन्तैः खण्डयेत्। तथा सति कतिचिदेव पशव एनं यज-मानं क्षीरदानादिभिः पालयन्तः प्राप्नुयुः, असम्भेदे बहवः प्राप्नुवन्तोऽपि क्षीरादिभिर्न पालयन्ति। मानसचर्वणे तु सम्भेदनमसम्भेदनञ्चेत्युभयस्य कृतत्वात् पशूनां नाल्पत्वं नापि क्षीरादिराहित्यञ्च। उन्नेतृहस्तगतं कृतशेषं सर्वे भक्षयितु-मुन्नेतुरनुज्ञामपेक्षेरन्निति विधत्ते "उन्नेतर्युपहवमिच्छन्ते य एव तत्र सोमपीथस्तमेवावरुन्धते" (सं०६का०।५प्र०।९अ०) इति। सर्वभक्षितावशेषाणां द्रोणकलशगतसोमानां निनयनं

प्रतिप्रधानं गुणावृत्तिरिति न्यायेन उपस्थानावृत्त्या श्रुतिलिङ्गयोः समुच्चय इति द्वितीयः पूर्वपक्षः। श्रुतिर्विनियुञ्जाना वस्तुसामर्थ्यमनुसृत्यैव विनियुङ्क्ते। अन्यथा वह्निना सिञ्चेदारिणा दहेदित्यपि विनियुज्येत। ततः उपजीव्यत्वेन लिङ्गस्य प्रबलत्वात् इन्द्र एव मन्त्रेण उपस्थेय इति तृतीयः पूर्वपक्षः। ऐन्द्रमन्त्रस्य गार्हपत्ये मुख्यवृत्त्या प्रकाशाभावेऽपि गौणवृत्त्या प्रकाशकत्वमस्तीति निवेशन इत्यस्मिन्नुदाहरणे पूर्वमेव प्रदर्शितं। तथा सति सामर्थ्याभावकृतप्रतिबन्धाभावान्निर्विघ्ना श्रुतिः शीघ्रं विनियुङ्क्ते। लिङ्गन्तु विलम्बते। मन्त्रपदान्यादौ स्वाभिधेयमर्थं प्रतिपादयन्ति। तत ऊर्द्ध्वं मन्त्रस्य सामर्थ्यं निरूप्यते। पश्चात्सामर्थ्यवशात् साधनत्ववाचिनी प्राधान्यवाचिनी च श्रुतिः कल्प्यते। सा च श्रुतिर्मन्त्रेण इन्द्रमुपतिष्ठत इति विनियुङ्क्ते। तथा सति प्रत्यक्षश्रुत्या स्वाभिधेयप्रतिपादनविनियोगयोर्मध्यवर्तिनौ सामर्थ्यनिरूपणश्रुतिकल्पनव्यापारौ न स्त इति प्राबल्यात्तया लिङ्गं बाध्यते। न च प्रत्यक्षश्रुतिविनियोगवेलायां अलब्धात्मकत्वेन अप्राप्तलिङ्गं कथं बाध्यत इति शङ्कनीयं। भविष्यत्प्राप्तिप्रतिबन्धस्यैवात्र बाधत्वात्। श्रुत्या विनियुक्तस्य मन्त्रस्य पुनर्विनियोगाकाङ्क्षानुदयाद्विनियोजकं लिङ्गं कथं प्राप्स्यति। तस्माद्गार्हपत्योपस्थाने मन्त्रः प्रत्यक्षश्रुत्या विनियुज्यते।

इति माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये प्रथमकाण्डे पञ्चमप्रपाठके अष्टमोऽनुवाकः ॥ ८ ॥

Digitized by Google

सन्धिः स व्यानो यो व्यानः सा वाक् तस्मादप्राणन्ननपानन् वाच-
मभिव्याहरति। अतो यान्यन्यानि वीर्यवन्ति कर्माणि यथाग्ने-
र्मन्थनमाजेः सरणं दृढस्य धनुष आयमनमप्राणन्ननपानꣳ्-
स्तानि करोति” (छा॰१प्र॰।३ख॰) इति। एवं बहुविध-
व्यापारहेतुत्वात् प्राधान्यं द्योतयितुं व्यानस्य द्विरुक्तिः। यद्वा
नागकूर्मकृकरादिवायुविशेषाणामचान्तर्भावमभिप्रेत्यापि पुन-
रुक्तिः। हे अन्वाहार्य त्वमचितोऽसि अपरिमितोऽसि इति
ब्राह्मणं इविषाशावन्वाहार्यं महान्तमपरिमितमोदनं पचतीति
सूत्रकारस्य। तस्मात् परलोकेऽप्यचित्यै त्वा त्वां ददामीति
शेषः। तेनाभिप्रायेण दीयमानत्वादमुत्र परलोके मे मम
भागाय मा चेष्ठाः क्षयं मा प्राप्नुहि। तस्मात् अहमप्यस्मिन्
लोके त्वां यथेच्छमनुभवामीति शेषः।

अथ विनियोगसङ्ग्रहः।

“अग्निः प्राशित्रावदानं यो मेऽन्ति स्वाग्निभागदं।
इडादयं सुरूपेति जुष्टिरित्यनुमन्त्रयेत्॥
अमो ऽद्धिर्मार्जनं ब्रह्म पुरोडाशं प्रजापतेः।
अन्वाहार्यं मन्त्रयेत मन्त्राः सप्तेह वर्णिताः”॥ इति।

इति माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये प्रथम-
काण्डे षष्ठप्रपाठके तृतीयोऽनुवाकः॥ ३ ॥



Digitized by Google

श्रोषधीनां गवामन्नं प्रसिद्धं। प्रभुत्वोपेतानाञ्च प्रजानां गृहेषु बहुजनभोजनाय श्रोह्यादोषधय आगत्य वर्तन्ते। एतद्वेदनं प्रशंसति "य एवं वेदान्नादो भवति" इति। पुनरपि तुभिन्नस्य गुणान्तरोक्तिमिडाया मुख्यत्वसम्पादिकामुदाहरति "श्रथ वै तामुपाह्व इति होवाच या प्रजाः पराभवन्तीरनुगृह्णाति प्रत्याभवन्तीर्गृह्णातीति" इति। येयमिडा व्याख्यादिभिः पराभूयमानाः प्रजाः स्वस्यामवस्थाप्यानुगृह्णाति, पराभूयमानाः प्रजास्तत्तदपेक्षितस्थानप्रदानेन स्वीकरोति। अस्या अपीडाया मुख्यत्वनिराकरणोक्तिं दर्शयति "प्रतिष्ठां वा अस्मै तदुपाह्वया इति होवाच" इति। प्रतितिष्ठत्यस्यामिडा गौरिति प्रतिष्ठा भूमिः तामेवोपहूतवानसि न मुख्यामिडां। तदेतदेव उपपादयति "इयं वा अस्मै प्रतिष्ठा इयं वै प्रजाः पराभवन्तीरनुगृह्णाति प्रत्याभवन्तीर्गृह्णाति" इति। वेदनं प्रशंसति "य एवं वेद प्रत्येव तिष्ठति" इति। मुख्यत्वसम्पादनाय गुणान्तरोक्तिं दर्शयति "अथ वै तामुपाह्व इति होवाच यस्यै निक्रमणे घृतं प्रजाः संजीवन्तीः पिबन्तीति" इति। यस्या वृष्टिरूपाया इडाया निक्रमणे न्यग्भावेन पतने सति यद् घृतं चरदुदकं तज्जीवनार्थिन्यः प्रजा उपजीवन्ति। तादृशीमिडामुपहूतवानस्मि। संश्रवा अस्यामिडायां पूर्ववद्दोषभावाभावौ पृच्छति "छिनत्ति सा न छिनत्तीर इति" इति, वृष्टेर्गवाश्वभूमीनामिव प्रतियाह्यद्रव्यत्वाभावात्। तुभिन्नस्य प्रतियहदोषाभावोक्तिं गुणान्तरोक्तिञ्च दर्शयति "न छिनत्तीति हो-

इति। कल्पः। अथ रथान् विमुच्यमानाननुमन्त्रयते "इयं वः सा सत्या सन्धाभूद्यामिन्द्रेण समधध्वं" इति। हे रथा वो युष्माकमियं सन्धा आजिधावनप्रतिज्ञा सा सत्याभूत्, यां प्रतिज्ञामिन्द्रेणेन्द्रानुग्रहेण समधध्वं सम्यग्धारितवन्तः। इन्द्रानुग्रहार्थैवेन्द्रस्य वज्रोऽसीति रथमन्त्र आम्नातः। कल्पः। दुन्दुभीनवसृतोऽनुमन्त्रयते "अजीजिपत वनस्पतय इन्द्रं वाजं विमुच्यध्वं" इति। हे वनस्पतयो वनस्पतिविकारा दुन्दुभय इन्द्रं यागस्वामिनं वाजमन्नमुद्दिश्याजीजिपत यथा जितवान् भवति तथा जितवन्तः, तादृशा यूयं पूर्वं यत्र बद्धास्ततो विमुच्यध्वं विमुक्ता भवत। बन्धनप्रदेशस्त्वापस्तम्बेन दर्शितः 'दक्षिणस्यां वेदिश्रोण्यां सम्प्रदश दुन्दुभीन् प्रबध्नाति' इति। विधत्ते "अजीजिपत वनस्पतय इन्द्रं वाजं विमुच्यध्वमिति दुन्दुभीन् विमुञ्चति। यमेव ते वाजं लोकमिन्द्रियं दुन्दुभय उज्जयन्ति। तमेवावरुन्धे" (ब्रा०) इति।

अथ विनियोगसङ्ग्रहः।

"देवारोहेद्रथं स्वामी ब्रह्मारोहणमन्त्रणं।
देवेतीन्द्रा दुन्दुभीनां घोषोऽभ्याज कन्नायहः॥
अर्वासीति त्रिभिर्मन्त्रैर्युनक्त्यश्वत्रयं रथे।
वाजीत्येतैर्मन्त्रयेत चतुर्भिर्धावतो रथान्॥
मितेत्याभिस्ततस्तभिस्तान् प्रत्याधावतो रथान्।
आ मा रथविमुक्त्याख्यं जुहुयात्, वाजिनदद्यात्॥
गतेः पुरोपरिष्टाच्च आपयेच्चरमश्वकान्।

कुर्युः। सवनत्रये स्तोत्रेषु ऋग्विशेषं विधत्ते "अनिरुक्ताभिः प्रातःसवने स्तुवते। अनिरुक्तः प्रजापतिः। प्रजापतेराप्त्यै। वाजवतीभिर्माध्यन्दिने। अन्नं वै वाजः। अन्नमेवावरुन्धे। शिपिविष्टवतीभिस्तृतीयसवने। यज्ञो वै विष्णुः। पशवः शिपिः। यज्ञ एव पशुषु प्रतितिष्ठति" (ब्रा०) इति। अनिरुक्ताभिर-व्यक्तदेवताकाभिर्ऋग्भिः साकल्येन तस्यर्त्विजो वक्तुमशक्यत्वात् प्रजापतिरनिरुक्तः, वाजशब्दोपेता ऋचो वाजवत्यः, शिपिविष्टशब्दोपेतास्त्रचः शिपिविष्टवत्यः, ताः सर्वाः सामवेदे द्रष्टव्याः। विष्टशब्दो विष्णुपर्यायः सन् अत्र फलव्यापिनं यज्ञमाचष्टे, शिपिशब्दः पशुवाची। अतः शिपिविष्टवतीभिर्ऋग्भिर्यज्ञे पशुषु च प्रतितिष्ठत्येव। सामविशेषं विधत्ते "हूहदन्त्यं भवति। अन्तमेवैनꣳ श्रियै गमयति" (ब्रा०) इति। अन्तिमस्य स्तोत्रस्य यदन्त्यं साम तद्बृहद्गायेत्, तेन गानेनैनं यजमानं श्रियै सम्पत्तिरूपे यज्ञस्यान्तं समाप्तिं प्रापितवान् भवति।

अत्र विनियोगसङ्ग्रहः।

"वाज सप्तभिरन्नस्य होमो देव यजुस्त्रयात्।
अभिषिञ्चेत्स्वामिनं तं दशमन्त्रा इहोदिताः"॥ इति।

इति माधवीये वेदार्थप्रकाशे कृष्णयजुःसंहिताभाष्ये प्रथमकाण्डे सप्तमप्रपाठके दशमोऽनुवाकः॥ * ॥



Digitized by Google

# INDEX TO THE FIRST VOLUME.

THE FIRST KÁNDA OF THE TAITTIRÍYA SANHITÁ.

*Prapáthakas* I.—VII.

*Prapáthaka* I.

I.—XIII. *Dars'apúrnamás'a-mantrá Ádhwaryaváh.* ... 13—254

I.—Vatsápakaranam, (Bráhmana, III. ii. 1.) ... ... 13
II.—Barhir-áharanam, (Br. III. ii. 2.) ... ... 49
III.—Dohah, (Br. III. ii. 3). ... ... ... 65
IV.—Havir-nirvápah, (Br. III. ii. 4.) ... ... 84
V.—Vríhy-avaghátah, (Br. III. ii. 5.). ... ... 103
VI.—Peshanam, (Br. III. ii. 6.) ... ... ... 121
VII.—Kapálopadhánam, (Br. III. ii. 7.) ... ... 127
VIII.—Purodás'a-'srapanam, (Br. III. ii. 8.) ... 135
IX.—Vedih, (Br. III. ii. 9, 10.) ... ... ... 147
X.—Ájya-grahanam, (Br. III. iii. 1—5). ... ... 167
XI.—Idhmá-barhis-sruchám prokshanádi, (Br. III. iii. 6.) 193
XII.—Ágharau, (Br. III. iii. 7.) ... ... ... 204
XIII.—Srug-vyúhanádi-mantráh, (Br. III. iii. 8—11.) 225

XIV.—*Tad-vikriti-mantráh,—Kámyeshti-yájyáh*, (Sanhitá, II. ii. 1.) ... ... ... ... 255—271

*Prapáthakas* II.—IV.

*Somayágah.*

*Prapáthaka* II.

I.—XIII.—*Soma-Kraya-prásnah*. ... ... ... 272—432

I.—Práchínavans'a-praves'ah, (Sanh. VI. i. 1). ... 272
II.—Vrata-sampádana-díkshá, (Sanh. VI. i. 2, 3). ... 290

Digitized by Google

III.—Deva-yajanam (Sanh. VI. i. 4.) ... ... 309
IV.—Soma-krayaṇí-gamanam, (Sanh. VI. i. 5—7). ... 320
V.—Soma-krayaṇí-pada-sangrahah, (Sanh. VI. i. 8.) ... 339
VI.—Somonmánam, (Sanh. VI. i. 9.) ... ... 348
VII.—Soma-krayah, (Sanh. VI. i. 10, 11.) ... ... 353
VIII.—Somasya s'akaṭáropaṇam, (Sanh. VI. i. 11). ... 360
IX.—Áropitasya gamanam, (Sanh. VI. i. 11.) ... ... 365
X.—Átithyeshtih, (Sanh. VI. ii. 1, 2.) ... ... 370
XI.—Upasadah, (Sanh. VI. ii. 2—6.) ... ... 384
XII.—Uttara-vedih, (Sanh. VI. ii. 7, 8.) ... ... 410
XIII.—Havirdhána-maṇḍapa-nirmáṇam, (Sanh. VI. ii. 9.) 421
XIV.—*Kamyeshti-yájyáh*, (Sanh. II. ii. 2.) ... ... 432—444

## *Prapáṭhaka* III.

### *Somay'aga (continued.)*

I.—XI.—*Agnishomíya-pas'u-pras'nah*, ... ... 445—552
I.—Sado-nirmáṇam, (Sanhitá VI. ii. 10.) ... ... 445
II.—Havirdhána-gatoparava-nirmáṇam, (Sanh. VI. ii. 11). ... ... ... ... ... 455
III.—Dhishṇiyáh, (Saṇh. VI. iii. 1.) ... ... 465
IV.—Vaisarjana-hutih, (Sanh. VI. iii. 2.) ... ... 473
V.—Yúpa-chhedah, (Sanh. VI. iii. 3.) ... ... 482
VI.—Yúpa-sthápanam, (Sanh. VI. iii. 4.) ... ... 491
VII.—Pas'or upákaraṇam, (Sanh. VI. iii. 5, 6.) ... 502
VIII.—Pas'or sanjnapaṇam, (Sanh. VI. iii. 6, 7, 8.) ... 510
IX.—Vapotkhedah, (Sanh. VI. iii. 9.) ... ... 524
X.—Vasá-homah, (Sanh. VI. iii. 10, 11). ... ... 531
XI.—Guda-káṇḍa-homah, (Sanh. VI. iv. 1.) ... ... 547
XII.—XIII.—*Somábhishavah*, ... ... ... 552—567
XII.—Vasatívaríṇám grahaṇam, (Sanh. VI. iv. 2.) ... 552
XIII.—Somasya s'akaṭád upávarohah, (Sanh. VI. iv. 3.) 559
XIV.—*Kámyeshṭi-yájyáh*, (Sanh. II. ii. 2, 3.) ... ... 567—585

Digitized by Google

## *Prapáthaka* IV.

*Soma-yága (continued).*

I.—XLV.—*Grahapras'nah pradhánah*, ... ... 586—757

I.—Sómábhishavah, (Sanh. VI. iv. 4.) ... ... 586

II.—Upáns'u-grahah, (Sanh. VI. iv. 5.) ... ... 593

III.—XLII.—Antaryámádiká graháh, (Sanh. VI. iv. 6—VI. v. 11.) ... ... ... ... 600

XLIII.—Dakshiná, (Sanh. VI. vi. 1.) ... ... 693

XLIV.—Samishta-yajur-homah, (Sanh. VI. vi. 2.) ... 704

XLV.—Avabhritah, (Sanh. VI vi. 3—11.) ... ... 711

XLVI.—*Kámyeshti-yájyáh*, (Sanh. II. ii. 4.) ... ... 757—768

---

## *Prapáthaka* V.

I.—IV.—*Punarádhánam* (for the *Agnyádhánam*, see T. Bráhmana, I. i. 2—10). ... ... ... 769—791

I. II.—Pradhánavidhis tad-angáni cha, ... ... 769

III. IV.—Ádhána-mantráh, ... ... ... 781

V.—X.—*Agnyupasthánam*, ... ... ... ... 791—831

V. VI.—Agnyupasthánam, ... ... ... 791

VII.—Panchamánuvákoktamantravyákhyánam, ... 804

VIII.—Shashthánuvákoktamantravyákhyánam, ... 810

IX.—Purvoktopasthánasyá 'gnihotrángatá, ... ... 817

X. 1—2.—Pravatsyato yajamánasya agnyupasthána-mantráh, ... ... ... ... 824

X. 3—4.—Dárs'ika-yájamána-mantráh,

XI.—*Kámyeshti-yájyáh* (Sanh. II. ii. 5, 6.) ... ... 832—851

---

## *Prapáthaka* VI.

I.—VI.—*Aishtika-yájamána-mantráh*, ... ... 852—894

I.—Ájya-grahanam, ... ... ... ... 852

II.—Havir-homah, ... ... ... ... 859

III.—Bhakshya idádibhágah, ... ... ... 869

Digitized by Google

IV.—Anuyájádi-s'esháhutiḥ, ... ... ... 876
V.—Ápyáyanádi-mantráḥ, ... ... ... ... 882
VI.—Súryopasthánádi-mantráḥ, ... ... ... 887

VII.—XI.—*Tad-bráhmaṇáni*, ... ... ... 894—938

VII.—Devatá-parigrahaḥ, ... ... ... 894
VIII.—Yajnáyudha-sambhṛitiḥ, ... ... ... 901
IX.—Dwádas'a-dwandwa-sampattiḥ, ... . ... 911
X.—Havis-sádanam, ... ... ... ... 922
XI.—Ás'rávanádi-mantráḥ, ... ... ... 929
XII.—*Kámyeshṭi-yájyá*h, (Sanhitá, II. ii. 7.) ... ... 939—953

## *Prapáṭhaka* VII.

I.—VI.—*Dárs'ika-yájamána-bráhmaṇa-s'esha*h, ... 954—988

I.—Iḍánumantraṇam, ... ... ... ... 954
II.—Iḍáyáh pras'ansá, ... ... ... ... 962
III.—Anváháryaḥ, ... ... ... ... 967
IV.—S'esháhutyanumantraṇam, ... ... ... 972
V.—Ápyáyanádi-mantráḥ, ... ... ... 977
VI.—Upasthánádi-mantráḥ, ... ... ... 982

VII.—XII.—*Vájapeya-vishayá ádhwaryava-mantrá*h, ... 989—1059

VII.—Ratha-mantráḥ, (Br. I. iii. 2—5.) ... ... 989
VIII.—Ratha-dhávana-mantráḥ, (Br. I. iii. 6). ... 1019
IX.—Yúpárohaṇam, (Br. I. iii. 7.) ... ... ... 1035
X.—Anna-homáḥ, (Br. I. iii. 8.) ... ... ... 1044
XI.—Ujjiti-mantráḥ, ... ... ... ... 1052
XII.—Atigráhya-mantráḥ, (Br. I. iii. 9.) ... ... 1054
XIII.—*Kámyeshṭi-yájyá*h, (Cf. Sanhitá, II. ii. 8.) ... 1059—1071

Digitized by Google